अलंकारसर्वस्वम्



पत्र

स्तवचिः

ॐश्रीगणेशायनमः ॐश्रीभगवत्यैसरस्वत्यैनमः ॐनमस्कृत्यपरांवाचंदेवींत्रिविधविग्रहाम् नि
अ॰ जालंकारसूत्राणांवृत्त्यातात्पर्यमुच्यते इहहितावद्भामहोद्भटप्रभृतयश्चिरंतनालंकारकाराःप्र
लं॰ तीयमानमर्थंवाच्योपस्कारकतयालंकारपक्षनिक्षिप्तंमन्यंते तथाहि पर्यायोक्ताप्रस्तुतप्रशं
सा॰ सासमासोक्त्याक्षेपव्याजस्तुत्युपमेयोपमानन्वयादौवस्तुमात्रंगम्यमानंवाच्योपस्कारकत्वेनस्वसि
१ द्धयेपराक्षेपःपरार्थंस्वसमर्पणमितियथायोगंद्विविधयाभंग्याप्रतिपादितंतैः॥रुद्रटेनतुभावा।
लंकारोद्विधैवोक्तः॥रूपकदीपकापह्नुतितुल्ययोगितादावुपमाद्यलंकारोवाच्योपस्कारकत्वेनोक्तः
उत्प्रेक्षातुस्वयमेवप्रतीयमानाकथितारसवत्प्रेयप्रभृतौरसभावादिर्वाच्यशोभाहेतुत्वेत्रिविधमपि
प्रतीयमानमलंकारतयाख्यापितमेव वामनेनतुसादृश्यनिबंधनायालक्षणायावक्रोक्त्यलं
कारत्वंब्रुवताकश्चिद्ध्वनिभेदोलंकारतयैवोक्तः॥केवलंगुणविशिष्टपदरचनात्मिकारीतिः।
नो॰४ काव्यात्मकत्वेनोक्ता उद्भटादिभिस्तुगुणालंकाराणांप्रायशःसाम्यमेवसूचितम् विषयमात्रे। १
णाभेदप्रतिपादनात् संघटनाधर्मत्वेनशब्दार्थधर्मत्वेनचेष्टः तदेवमलंकाराःकाव्यप्रदान

मितिप्राच्यानांमतम् वक्रोक्तिजीवितकारःपुनर्वैदग्ध्यभंगीभणितिस्वभावांबहुविधांवक्रो
क्तिमेवप्राधान्यात्काव्यजीवितमुक्तवान् व्यापारप्राधान्यंचकाव्यस्यप्रतिपेदे अभिधाप्रका
रविशेषाएवचालंकाराःसत्यपिचत्रिविधेप्रतीयमानेव्यापाररूपाभणितिरेवकविसंरंभ
गोचरः उपचारवक्रतादिभिःसमस्तोध्वनिप्रपंचःस्वीकृतः केवलमुक्तिवैचित्र्यजीवि
तंकाव्यं नव्यंग्यार्थजीवितमितितदीयंदर्शनंव्यवस्थितम् भट्टनायकेनतुव्यंग्यव्यापा
रस्यप्रौढोक्त्याभ्युपगतस्यकाव्यांशत्वंब्रुवतान्यग्भावितशब्दार्थस्वरूपस्यव्यापारस्यैवप्राधा
न्यमुक्तं तत्राप्यभिधाभावकत्वलक्षणव्यापारद्वयोत्तीर्णोरसचर्वणात्माभोगापरपर्या
योव्यापारःप्राधान्येनविश्रांतिस्थानतयांगीकृतः ध्वनिकारःपुनरभिधातात्पर्यलक्षणा
ख्यव्यापारत्रयोत्तीर्णस्यध्वननद्योतनादिशब्दाभिधेयस्यव्यंजनव्यापारस्यावश्याभ्युपग
म्यत्वाद्व्यापारस्यचवाक्यार्थत्वाभावाद्वाक्यार्थस्यैवचव्यंग्यरूपस्यगुणालंकारोपस्कर्त
व्यत्वेनप्राधान्याद्विश्रांतिधामत्वादात्मत्वंसिद्धांतितवान् व्यापारस्यविषयमुखेनस्वरूप

प्रतिलंभात्तत्व्याख्यानेन प्राधान्यात् स्वरूपेणाविदितत्वाभावाद्विषयस्यैव समग्रभरसहि-
ष्णुत्वम् तस्माद्विषय एव व्यंग्यनामा जीवितत्वेन वक्तव्यः यस्य गुणालंकारकृतचारुत्व
अ॰ लं॰ परिग्रहसाम्राज्यम् रसादयस्तु जीवितभूता नालंकारत्वेन वाच्याः अलंकाराणामुप
स॰ २ स्कारकत्वाद्रसादीनां च प्राधान्येनोपस्कार्यत्वात् तस्माद्व्यंग्य एव वाक्यार्थीभूतः काव्य
जीवितमित्येष एव पक्षो वाक्यार्थविदां सहृदयानामावर्जकः व्यंजनव्यापारस्य सर्वैरन
भ्युपगतत्वात्तदाश्रयेणाच पक्षोत्तरस्याप्रतिष्ठानात् यत्तु व्यक्तिविवेककारो वाच्यस्य प्रती
यमानं प्रति लिंगतया व्यंजनस्यानुमानांतर्भावमाख्यातवान् तद्वाच्यस्य प्रतीयमानेन
सह तादात्म्यतदुत्पत्त्यभावादविचारिताभिधानम् तदेतत्कुशाग्रधिषणैः क्षोदनीयमति-
गहनमिति नेह प्रतन्यते अस्ति तावद्व्यंग्यनिष्ठो व्यंजनव्यापारः तत्र व्यंग्यस्यास्फुटत्वेना
लंकारवत्त्वेन चित्राख्यः तृतीयः काव्यभेदः तत्रोत्तमो ध्वनिः तस्य लक्षणाभिधामूलत्वे २
नाविवक्षितवाच्यविवक्षितान्यपरवाच्याख्यौ द्वौ भेदौ आद्योऽप्यर्थान्तरसंक्रमितवाच्या

त्येतत्तिरस्कृतवाच्यत्वेन द्विविधः द्वितीयोप्यसंलक्ष्यक्रमव्यंग्यतया द्विविधः लक्षणा
मूलः शब्दशक्तिमूलो वस्तुध्वनिः असंलक्ष्यक्रमव्यंग्योऽर्थशक्तिमूलो वस्तुध्वनिः संलक्ष्य
क्रमव्यंग्यः शब्दार्थोभयशक्तिमूलो वस्तुध्वनिरलंकारध्वनिश्चेति तत्र रसादिध्वनिरलं
कारमंजर्यां प्रतिदर्शितः काव्यस्य शृंगारप्रधानत्वात् शिष्टस्तु यथावसरं तत्रैव विभा।
क्तः गुणीभूतव्यंग्येण वाच्यांगत्वादिभेदैर्यथासंभवं समासोक्त्यादौ दर्शितः चित्रं तु शब्दार्था
लंकारस्वभावतया बहुतरप्रभेदम् तथा हि इहार्थो येन कृतं शब्दो येन कृतं शब्दार्थौ येन
कृतं चेति त्रयः येन कृतस्य प्रकाराः आद्यौ येन कृतस्य प्रकारवचने वक्ष्यमाणालंकाराणां क
त्वाविभागाय घटनार्थमर्थापेक्षया शब्दस्य प्रतीतावन्तरंगत्वेपि प्रथममर्थगतयमैर्निर्देशः।
चिरंतनप्रसिद्ध्या पुनरुक्तवदाभासस्य पूर्वं लक्षणार्थः इहेति शास्त्रे प्रस्तावे इति शब्दः प्रा
कारे त्रिशब्दादेव संख्यापरिसमाप्तिसिद्धेः तत्रार्थो येन कृतं प्रकृ[illegible]दोषः अत्र च प्र
रे

ढाग्रहदृढत्वेनेष्टैविध्यम् प्रथमेहि यवचनमुपादेयेविश्रान्त्यर्थम् तेनैतिन्नयनिर्धारणायथा
भासनेविश्रान्तिःप्ररोहः आमुखादाभासमात्रेणुनहत्त्वदाभासम् आमुखग्रहणायर्थव
अ॰लं॰ स॰ ३ सानेन्यथात्वप्रतिपत्त्यर्थम् लक्षणनिर्देशेनापुंसकः संस्कारोलौकिकालंकारवैधर्म्येणाका
व्यालंकाराणामलंकार्योपारनेत्रायत्वननार्थ्यः अर्थयोनहन्यादेवार्थाज्ञानत्वादर्थालंकार
३ त्वेज्ञेयम् प्रभेदास्तुविस्तरभयान्नोच्यन्ते उदाहरणंमदीयेश्रीकण्ठस्तवे यथाअहीन
भुजगाधीशवपुर्वलयंकंकणम् शैलादिनंदिचरितेहृनकेदर्पदर्पकम् वृषपुंगवल
क्ष्माणंशिशिवयावकलोचनम् समर्थमंगलेनोमिपार्वतीसखमीश्वरम् दारुणाकाष्ठ
तोजातोभस्मभूतिकःपरमकशोराणांविरुद्धराजयोभवःपावकःशिखी एतस्मस्वेनाये
ह्रयातिइं.तापेहृया यथानैवेव भुजंगकुंडलीव्यक्तशशिशुभ्रांशुशीतगुः जगंत्यपि
सदापायादेव्याश्चेतोहरःशिवः शब्दयेनहतंव्यंजनमात्रयेनहतंचस्वरव्यंजनसमु ३
दायेनहतंच अलंकारप्रस्तावेकेवलस्वरेणहतमचारुत्वान्नगण्यते इतिद्वे

विघ्नमन्तकम् संख्यानियमे पूर्वं छेकानुप्रासः द्वयोर्व्यंजनसमुदाययोः परस्परमनेक
यासादृश्यंसंख्यानियमः पूर्वंव्यंजनसमुदायाभिन्नंयथा किंनामदर्दुरदुरध्यवसाय
सायंकायेनिपीडनिनदंकुरुषेरुषेव पत्रालिकेलिरसितानिसितबद्धदानामाकल्प
करीमधुराणिनलज्जितोसि अत्रसायंशब्दस्यालंकारस्ययकारमात्रसादृश्यापेक्षया
वृत्त्यनुप्रासेनसंछेकाभिधानलक्षणाः संकरः छेकाविदग्धाः अन्यथावृत्त्यनुप्रासः
केवलंव्यंजनसादृश्यमेकधासमुदायसादृश्यंआदीनांचपरस्परसादृश्यमन्यथाभा
वः वृत्तिस्तुरसविषयोव्यापारः तद्वतीवर्णरचनेहवृत्तिः साचपरुषकोमलमध्यम
वर्णारब्धत्वात्त्रिधातदुपलक्षितैर्यमनुप्रासः आटोपेनपठनीयमायदपिसावाणीकेवला
मुरेखरेखलंतीप्रथनेनतथापिकृतेनोसन्मनोरंजनम् नस्याद्यावदमंदसंदरगुणालंका
रलेकाविनः सप्रसंदिलसद्रसायनरसासारानुसारीरसः यथावा सद्यःपन्नगहृत्कृ
नानलशिखानाराचपात्यापिवाराकिंदोःकिरणाविषद्रवमचोवर्षाम्बुवावायवः नवे

नाः सरलासिता सितरुचः साचीकृताः सालसाः साकूताः समदाकुरंगकदृशो मानान्तविद्धा

दृशः ॥ स्वरव्यंजनसमुदाययोर्नरुक्तं यमकम् अत्र क्वचिद्भिन्नार्थत्वं क्वचिदभिन्नार्थत्वं क्व

अ॰ लं॰ चिदेकस्यानर्थकत्वमपरस्य सार्थकत्वमिति संक्षेपतः प्रकारत्रयम् यथा यो यः पश्य

स॰ ४ नै तितन्नैवेत्र कश्चिदेव न जायते नस्यतस्यान्यनैवेत्रपुरुकश्चिदेव न जायते इदं सार्थकत्वेप्येवमच्छे गे =

ज्ञेयम् शब्दार्थयोर्नरुक्तं प्रकृष्टदोषः प्रकृष्टग्रहणं वक्ष्यमाणप्रभेदवैलक्षण्यार्थ

म् यदाहुः शब्दार्थयोः पुनर्वचनं पुनरुक्तदोषमन्यत्रानुवादादिति तात्पर्यभेदवत्तु ला

टानुप्रासः तात्पर्यमन्यपरत्वं तदेव विभद्यते न तु शब्दार्थयोः स्वरूपम् यथा नालाञ्जा

श्रेतिजालाटे सहितमपहितं विपने इह किरणारागाग्निमिश्रा इह हो नि कमलाः कमलाः इह

— मः किं यत्नयकण्ठे चनकालमल्पमाञ्जपत्रनयनेन नयनेनिमीलतं हे मांतुजेन रुणाऽजर

सापहृत्यदेव द्विषायमहमागत इत्येवेहि अत्राब्जपत्रनयनेन नयनेनिमीलयत्वादौ विभ ४

न्यादेरपौनरुक्त्येऽपि वक्तुरशब्दार्थयोर्नरुक्त्या लाटानुप्रासत्वमेव काशाः काशा इवे

न्या
त्वादावनन्वयेनसहासैकाभिधानलक्षणोनेकः अन्योन्यापेक्षशब्दार्थगतत्वेनत्वर्थ
मात्रगतत्वेनचावस्थितेर्भिन्नविषयत्वात् अनन्वयेचशब्दैक्यमौचित्यादानुषंगिकम् अ
न्तु = स्मिन्तु लाटानुप्रासस्मात्वादेव प्रयोजकम् तदेवंयेनरूपेणालंकाराः निगदन्तौ। व्या=
ख्यातमेतत् वर्णानांखड्गाद्याकृतिहेतुत्वेचित्रम् येनकेनप्रस्तावेस्थानविशेषश्लिष्टव
र्णोयेनरूपेणात्मकंचित्रवचनम् यद्यपिलिप्यक्षराणांखड्गादिसन्निवेशविशिष्टत्वंतथापि
श्रोत्राकाशसमवेतवर्णात्मकशब्दाभेदेनतेषांलोकेप्रतीतेर्वाचकशब्दालंकारोयम् आदि
क्र= ग्रहणाद्यथाऽनुत्पत्तिसंभवंपद्मबंधादिपरिग्रहः यथा भासतेप्रतिभासारसाभानाहृा
ताविभा भावितात्माशुभावादेदेवाभावततेसभा
पद्माष्टदलपद्मबंधः अत्रदिग्दलेषुनिर्गमनप्र
द्वे वेशान्तौश्लिष्टाक्षरत्वम् विदिग्दलेषुप्रत्यन्यथा
कर्णिकाक्षरंतुश्लिष्टमेव उपमानोपमेययोस्साम्य

र्म्मे भेदाभेदतुल्यत्वे उपमा अर्थालंकारप्रकरणमिदम् उपमानोपमेययोरित्यप्रतीतो
अ·लं· पमानोपमेयनिषेधार्थम् साधर्म्ये त्रयः प्रकाराः भेदप्राधान्ये व्यतिरेकादिवत् अभेदप्रा
स· धान्ये रूपकादिवत् द्वयोस्तुल्यत्वे यथास्यात् यदाह यत्किंचित्सामान्यं कश्चिच्च विशेष
स्स विषयः सदृशतायाः इति उपमैवानेकप्रकारवैचित्र्येणानेकालंकारबीजभूतेति प्रथ
मं निर्दिष्टा अस्याश्च स्वरूपं तुल्यत्वे भेदाश्चैतैर्बहुविधत्वमुक्तम् तत्रापि साधारणध
र्मस्य क्वचिदनुगामित्वे एकरूप्येण निर्देशः क्वचिद्वस्तुप्रतिवस्तुभावेन पृथग्निर्देशः पृथ
उ· निर्देशे च संबंधिभेदमात्रं प्रतिवस्तूपमावत् बिंबप्रतिबिंबभावो वा दृष्टान्तवत् क्रमे
णोदाहरणम् प्रभामहत्त्या शिखयेव दीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः संस्कारवत्येव
गिरा मनीषी तया स पूतश्च विभूषितश्च येनामकुवलितकं परमाननेन दाहृतं हृतश
तपत्रनिभं वहंत्या दिग्धोमृतेन च विषेण च पक्ष्मलाक्ष्या गाढं निखात इव मे हृदये कटा
क्षः अत्र वलितत्वाहतत्वे संबंधिभेदाभिन्नेयमभिप्रायेणात्र बिंबप्रतिबिंबत्वमेव पा

रोप्यायमं समर्पितलंबहारः स्नानांगरागो हरिचंदनेन आभाति बालातपरक्तसानुः सनिर्झ-
रोद्गार इवाद्रिराजः अत्र हारांगरागयोर्निर्झरबालातपौ बिंबप्रतिबिंबत्वेन निर्दिष्टौ ए-
कस्यैवोपमानोपमेयत्वे अनन्वयः वाच्याभिप्रायेणासर्वरूपावगमः एकस्यैव विरुद्धय-
मेकं संसर्गो द्वितीयसब्रह्मचारिनिवृत्त्यर्थः अत एवात्रानन्वय इति योगोपि संभवति यथा
युद्धेर्जुनेनार्जुन इव प्रथितप्रतापो भीमोपि भीम इव वैरिषु भीमकर्मा न्यग्रोधवर्तिनमथाधि-
पतिं कुरूणामत्याशनार्थमधिजग्मतुरादरेण द्वयोः पर्यायेणास्मिन्नुपमेयोपमा तच्छ-
हेनोपमानोपमेयत्वप्रत्यवमर्शः पर्यायो यौगपद्याभावः अत एवात्र वाक्यभेदः इयंच
मस्यसाधारणेपि वस्तुप्रतिवस्तुनिर्देशे च द्विधा यथा खमिव जलं जलमिव खं हंस इव चंद्र
इव चंद्र इव हंसः कुमुदाकारास्ताराः ताराकाराणि कुमुदानि द्वितीयो यथा सच्छायां-
भोजवदनाः सच्छायवदनांबुजः वाप्यो गना इवाभांति यत्र वाप्य इवांगनाः सदृशानुभ-
वात्तद्वस्तुस्मृतिः स्मरणम् वस्त्वन्तरे सदृशमिव वस्त्वविनाभावाद्वानुमानम् यथा अति

शयितस्तु रामस्य प्रभावं शिशुमवलोक्य तेनैव तत्त्वमुक्तम् । कुशिकसुतमखविद्विषां प्रमा
थेऽग्रतः पदं रघुनंदने स्मरामि सादृश्यं विनास्मृतिर्नायमलंकारः यथा अत्रानुरागादं
अ.लं. मृगयानिहतस्तुरंगवातेन विनीतखेदः रहस्त्वदुत्संगनिषण्णमूर्धा स्मरामि वानीरगृहे
स. षु सुप्तम् अत्र चकितं हि विशेषणानां स्मर्तव्यदशाभावित्वे स्म दशाभावित्वमसमीची
६ नम् अथ यथालंकारस्य तत्सादृश्यव्यतिरिक्तनिमित्तेनाप्यापतन्स्मृतिविषयः यथा अ
6 होकोऽपि पिकानां मुखमिति तत्रापि विभावाद्याश्रितत्वेन स्मर्यमाणमात्रप्रतिपाद्यत्वे य
था अत्रानुरागादमित्यादि येऽदृष्टा मितदाललाटापतितश्रासप्रहारोऽयुधि स्फीतानाम्
करस्तुतिपाटलीकृतपरोमागः पराज्यानयत् तेषां दुःसहकालदेहदहनप्रोद्धूतेने
त्रानलज्वालावलीभरभास्वरे स्मरारिघावल्लीगतेकौतुकमी इत्यादौ सदृशवस्तुनभा
वे शक्यवस्तुत्वे रक्षणात्मा विशेषालंकारः करणस्य क्रियासामान्यात्मनोऽदर्शने ६
पि संभवात् मतांतरे काव्यलिंगमेतत् तदेतत्सादृश्यपादाश्रयेण भेदाभेदतुल्यत्वेऽलं ।

कारानिर्णीताः संप्रतिभेदप्राधान्येनकथ्यन्ते अभेदप्राधान्येआरोपेआरोपविषा-
यानपह्नवेरूपकम् अभेदस्यप्राधान्याद्भेदस्यचसतः सद्भावः अन्यथात्वावापआ
रोपः तस्यविषयविषयव्यवस्थत्वाद्विषयस्यापह्नवेःपह्नुतिः अन्यथानविषयिणा
विषयस्यरूपवतःकरणाद्रूपकम् साधर्म्यंतत्रगतमेव यदाऊमुपमेवतिरोभूतभे
दारूपकमिष्यते इति आरोपादभेदेसत्यध्यवसायप्रकाश्यते इतिपश्चात्तन्मूला-
लंकारविभागः इदंनिरवयवंसावयवंपरंपरितंचत्रिविधं आद्यंकेवलमालारूपकं
चेतिद्विधा द्वितीयंसमस्तवस्तुविषयमेकदेशविवर्तिचेतिद्विधैव तृतीयंश्लिष्टाश्लि
ष्टशब्दनिबंधनत्वेनद्विविधंसत्प्रत्येकंकेवलमालारूपकत्वाच्चतुर्विधम् तदेवमा-
ष्टौरूपकभेदाः अनेनप्रत्येकंकेवलमालारूपकत्वाच्चतुर्विधम् तदेवमष्टौरूपकभे
दाः अनेनप्रत्येकंवाक्योक्तसमासोक्त्यादिभेदाःसंभवंति तेत्वनेनाऊह्याः क्रमेणयथा

श्र.ले.
स्तु.
7

दासेकृतागसिभवत्युचितःप्रभूणांपादप्रहारइतिसुन्दरिनास्मिदूये उद्यत्कठोरपुलकां
ङ्कुरकण्टकाग्रैर्यत्खिद्यतेतवपदंननुसाव्यथामे पीयूषप्रसृतिर्नवामरवधूजंघाद्वयंतन्मो
ल्लंघ्ययेस्वर्गगंगाविमनस्ककोकवदनस्तम्भनालीलता द्विर्भावःस्मरकार्मुकस्यकि
मपिप्रारोहश्रीसागसामाशान्तेन्दुदंचनितप्रतिपदिप्रालेयभानोस्तनुः विस्तारशालिनि
नभस्तलपत्रपात्रेक्षेदोज्ज्वलप्रभमसंचयमूर्विभक्तम् गंगातरंगगहनमाहिषदुग्धदिग्ध
जगद्यमयानरपतेकलिकालकर्णा आभातितेद्विनिमृतनद्ब्राणादाप्रभेयनिस्त्रिंशमांस
लनमालववंतातलेखा इंदुर्विषायुधिपहृदेननवारिकीर्तीरानीययत्रदमनेनतरुणाःप्रता
पः द्विजित्मृतनरस्तत्रम्लिहशाहेपरस्परितम् किंपङ्कस्यरुचिंतहेत्तिनयनानेदंवियन्ते
नवाहर्युंवाफषकेतनस्यरूढेनतालोकमात्रेणकिम् वेक्ष्येदानवमन्ययंयदपरःशीतां
शुरभ्युक्षितादपःस्यादमृतेननचेदिहतदप्यस्मेवविंबाधरे अत्रवेक्षेऽइन्दूपराणाहेतवेपीयू
षराशिपरामृतस्पर्शिलिहशाहेन्दूपराम् विहन्मानसक्लेसवैरिकमलासंकोचदीमयुते।

दुर्गमार्गणानीललोहितसमित्स्वीकारवैश्वानर सत्यप्रीतिविधानदक्ष विजयप्राग्भा
वभीमप्रभो साम्राज्यं वरवीर वत्सरशतं वैरिंचमुच्चैः क्रियाः अत्र त्वमेवहं स इत्यारोप
णाच्छ्लेषकोमं नसमेवमानसमित्यारोपः श्लिष्टशब्दमालापरंपरितम् यस्मिमनैवाक्य
यैः शरणीकरणात्मकं जगत्त्राणं जन्मजरामरणारोविनरणात्तरं इह वीरांघ्रियुगम् पल्ल
कोराजलक्ष्म्याहृतिनमणीमयः पौरुषाह्वोऽलंकारो भग्नप्रभार्थिवंशोल्वनविजयकरिस्या
पणानदानेऽम्बुपदः संग्रामक्षमनासंपदुदलपतियशोहंसलीलांबुवाहः खड्गाक्ष्मासोऽविरहः
समितिविजयने मालवाखंडलस्य अत्रक्ष्मासोविरहः इति परंपरितमपि एकदेशविव
र्ति एवमादयोऽन्येपि भेदा लेशतः सूचिता एव इदं वैधर्म्येणापि दृश्यते यथा सौजन्यांबु।
मरुस्थलीसुचरितालेख्यघुभित्तिर्गुणज्योत्स्नाकृष्णचतुर्दशीसरलतायोगश्वपुच्छच्छटा।
दा यैरेषापि दुराशया कलियुगे राजावली सेविता तेषां शूलिनि भक्तिमात्रसुलभे सेवा कि
यत्कौशलम् अत्र चारोप्यमाणस्य यपित्वादावि सूलिंगनेपि हुचिन्तनासंभवं सर्वा।

योगस्यापिविषयसंख्यात्वंप्रत्येकमारोपात् क्वचिज्जटावल्कलावलंबिनःकपिलादावा
ग्नयइत्यादौनहिकपिलमुनेर्बहुत्वम् भ्रमिमरतिमलसहृदयतांप्रलयंमूर्छांतमःश
रीरसादंच मरणंचजलदभुजगजंप्रसह्यकुरुतेविषंवियोगिनीनामित्यत्रनियतसंख्या
ककार्यविशेषोत्पादिनोगरलार्थप्रभाविनोविषशब्देनैषएव जलदभुजगजमितिरू
पकसाधकमितिपूर्वसिद्धत्वाभावान्नतन्निबंधनेविषशब्देश्लिष्टशब्दंपरम्परितमितिश्ले
षएवेत्याहुः आरोप्यमाणस्यप्रकृतोपयोगित्वेपरिणामः आरोप्यमाणंरूपकेप्रकृ
तोपयोगित्वाभावात्प्रकृतोपरंजकत्वेनैवकेवलेनान्वयंभजते परिणामेतुप्रकृतात्म
तयाआरोप्यमाणस्योपयोगइतिप्रकृतमारोप्यमाणरूपत्वेनपरिणमति आगमान
गमविगमख्यात्यभावान्नारख्येयपरिणामवैलक्षण्यम् तस्यसामानाधिकरण्येवै
यधिकरण्येप्रयोगाद्वैविध्यम् ती- भूतेशमौलिस्रजममरधुनीमात्मनासौतृतीय ८
स्तस्मैसौमित्रिमैत्रीमयमुपकृतवानातरंनाविकाय व्यामग्राह्यस्तनीभिःशबरयुव

तिभिः कौतुकोदंचद्दृष्टं हृत्कुद्दनीयमानह्वारामचलमथो विचित्रहृष्टं प्रतस्य अत्र सोमि

त्रिमैत्रीप्रकृतात्रारोप्यमाणमाणस्य मानाभिकरणानद्रूपत्वेन परिणामता अत्र तस्य मैत्री

रूपतया प्रकृतेनपयोगात् तदत्र यथा समासोक्तावारोप्यमाणं प्रकृतोपयोगि उपा।

रोपविषयात्मतयानत्रास्थितमतएवनत्रतद्व्यवहारसमारोपः एवमिहापिज्ञेयम् केव।

लंतत्रविषयस्यैवप्रयोगोविषयिणोगम्यमानत्वात् रूपकतद्योरयमभिधानं तदात्म्यात्

तयोः परिणामित्वम् द्वितीयायथा अथप्रक्तिमितामुपेयवद्भिः सरसैर्वचोभिर्यथाश्रितै

र्वचोभिः स्तितिभर्तृरूपायनं चकार प्रथमं तत्परतत्त्वं रंगमाद्यैः राजसंघट्टनेउपाय

नमुचितेउपायत्वं चानुरूपमिति वचसा व्यधिकरणोपायनरूपत्वेन परिणामः विषय।

स्य संदिह्यमानत्वे संदेहः अभेदप्राधान्ये आरोपे इत्येव विषयः प्रकृतोर्थो यद्भितित्वेना

प्रकृतः संदिह्यते अप्रकृते संदेहेपि विषये संदिह्यते एवं तेन प्रकृताप्रकृतगतत्वेन का।

विप्रतिभोत्थिते संदेहे संदेहालंकारः सच त्रिविधः शुद्धो निश्चयगर्भो निश्चयांतश्च शुद्धो।

यस्य संशयस्यैव पर्यवसाने यथा किं तारुण्यतरोरियं रसभरोद्भिन्ना नवा वल्लरी लीलाप्रो
च्छलितस्य किं लहरिका लावण्यवारांनिधेः उद्गाढोत्कलिकावतां स्वसमयोपन्यास-
अ·लं· विस्रम्भिणः किं साक्षादुपदेशयष्टिरथवा देवस्य शृङ्गारिणः निश्चयगर्भो यः संशयो या-
स· ९ क्रमो निश्चयमध्यः संशयान्तः स्यात् स यथा अयं मार्तण्डः किं स खलु तुरगैः सप्तभिरितः
9 कृशानुः किं साक्षात्प्रसरति दिशो नैष नियतम् कृतान्तः किं साक्षान्महिषवहनोऽसाविति
रसमालोक्याजौ त्वां विदधति विकल्पान्प्रतिभटाः निश्चयान्तो यत्र संशये तु यत्क्रमो
निश्चये पर्यवसाने यथा इन्दुः किं क्व कलङ्कः सरसिजमेतत्किमम्बु कुत्र गतम् ललितस
विलासवचनैर्मुखमिति हरिणाक्षि निश्चितं परतः क्वचिदारोप्यमाणानां भिन्नविषय
त्वेन रूप्यते यथा रञ्जिता नु विविधास्तरुशैला नामितं नु गगनं स्थगितं नु पूरिता नु विष
मेषु पृथ्वी संहृता नु ककुभस्तिमिरेण अत्रारोपविषये तिमिरेण गादिदुर्व्यादिभिन्ना ९
श्रयत्वेनारोपितम् केचित्त्वध्यवसायाश्रयेणान संदेहप्रकारमाहुः अन्ये तु नयाहस्य

संभावनाद्योतकं समुत्प्रेक्षाप्रकारमिममाचक्षते सादृश्याद्वस्त्वन्तरप्रतीतिर्भ्रान्तिमान् अ
सम्यग्ज्ञानत्वसाधर्म्यात्संदेहानन्तरमस्य लक्षणम् भ्रान्तिश्चित्तधर्मः स विद्यते यस्मिन्भणि
तिप्रकारे स भ्रान्तिमान् सादृश्यप्रयुक्ता च भ्रान्तिरस्य विषयः यथा ओष्ठे बिम्बफलाशा
यालमलकेष्वम्बुजेन्द्रधियाकरांगुलीकृतभाजि दाडिमफलभ्रान्त्या च शोणे मणौ ।
न्यस्यासकृदुत्पलच्छदृशामाभक्षमाणो मुदे राजन्नर्जरराजपञ्जरशुकैः सद्यस्त्विषा
मूर्छितम् गाढमर्मप्रहारादिना भ्रान्तिर्नास्यालंकारस्य विषयः यथा दामोदरकराघा
तचूर्णिताशेषवक्षसा दृष्टं चाणूरमल्लेन शतचन्द्रं नभस्तलम् सादृश्यहेतुकापि भ्रा
न्तिर्विच्छित्त्यर्थं कविप्रतिभोत्थापितैव गृह्यते यथोदाहृतम् न स्वरसोत्थापिता शुक्ति
कारजतवत् एवं स्थाणुर्वा स्यात्पुरुषो वेति संशयेऽपि बोद्धव्यम् एकस्यापि निमित्तव
शादनेकधा ग्रहणमुल्लेखः यदेकं वस्त्वनेकधा गृह्यते स रूपबाहुल्यादुल्लेखनादुल्लेखः
न चेदं निर्निमित्तमुल्लेखमात्रमपि तु नानाविधधर्मयोगित्वाख्यनिमित्तवशादेतत्क्रि ।

यते अत्ररुचिकित्वमुत्पतयोयथायोगंप्रज्ञीविकाः तदुक्तम् यथारुचियथार्थित्वंयथा
अ.लं. व्युत्पत्तिभिर्यते आभासोऽप्यर्थएकस्मिन्ननुसंधानसाधितेइतियथा यत्तपोवनमितिमु
स. निभिःकामायतनमितिवेश्याभिः संगीतशालेतिलासकैः इत्यादिहर्षचरितेश्रीकंठा-
१० ख्यजनपदवर्णने अत्रैकएवश्रीकंठाख्योजनपदस्तत्तद्रागयोगात्तपोवनाद्यनेकरू-
10 पतयानिरूपितः रुचिर्थित्वव्युत्पत्तयः प्रायशः समस्तव्यस्तायोजयितव्याइति नत्वतम
प्येवज्रपंजरमितिशरणागतैरसुरविवरमितिवार्तिकैरित्यादौरूपकालंकारयोगाद्
तिकथमयमुल्लेखालंकारविषयः सत्यम् अस्तितावत्तपोवनमित्यादौरूपकविवि
क्तस्यविषययदत्रवस्तुतः तद्रूपतायाःसंभवः अत्रतुरूपकंव्यवस्थितं नत्वेचेदियमा-
पिभंगिः संभाविनी उत्सेकरोऽस्तुनत्वेतावतास्याभावस्यकानेकत्वम् तत्रनुनदोषःक
श्चित् एवंतर्हितत्रविषयेभ्रांतिमदलंकारोऽस्तु अतद्रूपस्यतद्रूपताप्रतीतिनिबंधनत्वा १०
त् नैतत् अनेकधाग्रहणाख्यस्यापूर्वस्यातिशयस्याभावात् तद्धेतुकत्वाच्चास्यालंका

वस्तुसंकरप्रतीतिरस्त्वंगीकृतैव यद्येवमभेदे भेद इत्येवंरूपातिशयोक्तिरत्रास्तु नैष दोषः ग्र-
हीतृभेदाख्यत्वविषयविभागेनानेकधात्वोट्टंकनात्‌ तस्य च विच्छित्यंतररूपत्वात्‌ सर्वथाना
स्यानभावः शक्यक्रिय इति निश्चयः यथा वा गागनाभ्यसूतिपरिगाअवश्याग्रहिंसिहिवल्लहेरा
ति नकृणीग्रहिंबालाग्रहिंतगाकोहकूलेन पेमअसमुविजे एवं गुरुर्वचसि पृथुरुरसि अर्जु-
नो यशसि इत्यादौ अवसेयम्‌ इयांस्तु विशेषः पूर्वत्र ग्रहीतृभेदेनानेकधोल्लेखः इह तु
विषयभेदेन नन्वनेकधोल्लेखो गुर्वादिरूपतया श्लेष इति कथमलंकारांतरमत्र स्यादिति
सत्यम्‌ अनेकधात्वनिमित्तं तु विच्छित्त्यंतरमत्र स्पष्टमेवेति तत्प्रतिभोत्पत्तिहेतुः श्लेषोऽत्र
स्यात्‌ न तु सर्वथा तदभावः अत एवालंकारांतरं यदेवं विधं विषये श्लेषाभावेऽपि विच्छित्ति
सद्भावः तस्मादेवमादौ अनेकोल्लेख एव श्रेयान्‌ एवमलंकारांतरविच्छित्त्याश्रयेणाप्यलं
कारो दर्शनीयः विषयापह्नवे अपह्नुतिः वस्त्वंतरप्रतीतिरित्येव प्रक्रान्तानपह्नवे वैयर्थ्यमतोऽभिधीयमा-
च्यते आरोपप्रस्तावादारोपविषयापह्नुतावारोप्यमाणप्रतीतावपह्नुत्याख्योऽलंकारः

तस्य च त्रयी वंधच्छाया अपह्नवपूर्वकः आरोपः आरोपपूर्वकः पह्नव—लादिशो द्वेरस्त
यत्वप्रतिपादकैर्वापह्नवनिर्देशः पूर्वकभेदद्वये वाक्यभेदः तृतीयभेदे त्वेकवाक्यत्वम्
अ॰लं॰ आद्यो यथा यदेतच्चंद्रान्तर्जलदलवलीलां प्रकुरुते तदाचष्टे लोकः शशक इति नो मां प्र
स॰ ति तथा अहं त्विंदुं मन्ये त्वदरिविरहाक्रांततरुणीकटाक्षोल्कापातव्रणकिणकलं
११ कांकिततनुम् अत्रैंदवशशकस्यापह्नवेन तत्पादविप्रेशशाकप्रतिवस्तुकिणवत्त्वं इदारो
॥ पेनानन्वयच्छ्रतनं पुष्णातीति न निरवद्यत्वं तत्तु यथा पूर्णेंदोः परिपोषकांतिवपुषः
स्फारप्रभाभास्वरे नेदं मंडलमभ्युदेति गगनाभोगे जिगीषोर्जगत् मारस्याङ्कितमातप
त्रमधुना पांडुप्रदोषश्रिया मानोन्नद्धजनाभिमानदलनोद्योगैकहेवाकिनः द्वितीयो
यथा विलसदमरनारीनेत्रनीलाब्जखंडान्यधिकसतिसदायः संयसायः कृतानि न
नलिनकलापवर्तिनेयामयूरे विच्छुरन्तस्सरजसा वो ब्रह्मचर्यश्रियेवः तृतीयो यथा उ १२
त्तुंगोनाजिनमहगलरवपर्यंकपाकुलोष्टेन्दुः चर्चं प्रारवोलामलहारवल्लिविगलन्मुक्ताफल

ष्कृतं नामार्थं त्वद्विपुभिस्त्वदीययशसां शङ्के यमसौ यावत्तां भवं हं राज्ञमगांकं कुंदमंडल
स्थलेः श्रमाभः करोतः अत्र च व्यस्तस्य स्थाने मत्यशब्दप्रयोगे सापह्नवोत्प्रेक्षा इत्यपि
वक्ष्यते स्थापयिष्यते अहं त्विदं मन्ये इति न वाक्यभेदे मत्यशब्दप्रयोगे नोत्प्रेक्षेति च
वक्ष्यते एतस्मिन्नपि भेदे अपह्नवारोपयोः पौर्वापर्यप्रयोगविपर्यये भेदद्वयं सदपि न दृ
ष्टवैचित्र्यं नातिबहु इति न भेदत्वेन गणितम् तत्रापह्नवपूर्वके आरोपे तिर्यंतरमुदाहृतम्
आरोपपूर्वके त्वपह्नवे यथा ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थीन्यन्तर्धान
व्यसनरसिका रात्रिकापालिकेयम् द्वीपाद्द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले न्यस्तं सि
द्धांजनपरिमलं लांछनस्य च्छलेन कैतवं तु नरसत्यत्वेवल्लेनरूपताभिधायिवचः
शब्दनिबंधनम् यथा अमुष्मिंल्लावण्यामृतसरसि नूनं मृगदृशः स्मरः सर्वप्लुष्टः प्र
थुजघनभागे निपतितः यदंगांगाराणां प्रशमपिशुना नाभिकुहरे शिखा धूमस्येयं प
रिणमति रोमावलिवपुः इत्येवमभेदप्राधान्ये आरोपगर्भानलंकारांल्लक्षयित्वाध्यव

साध्यगर्भीकृतमिति तत्राध्यवसाये व्यापारप्राधान्यं तत्र हि विषयनिगरणेनाभेदप्रतिप
त्तिर्विषयिणोऽध्यवसायः स च द्विविधः साध्यः सिद्धश्च साध्यो यत्र विषयिणोऽसत्यतया
अ॰ल॰ प्रतीतिः व्यापारस्य विषयनिगीर्यमाणतायाः असत्यत्वं च विषयिगतस्य धर्मस्य वि
स॰ षये उपनिबन्धे विषयिसंभवित्वेन विषयासंभवित्वेन च प्रतीतेः धर्मो गुणक्रिया
१२ रूपः तस्य संभवासंभवप्रतीतौ संभवाश्रयस्यापरमार्थतया सत्यत्वं प्रतीयते इतरस्य तु
12 परमार्थतयासत्यत्वम् यत्रांशे सत्यत्वं तस्य सत्यत्वप्रतीतौ व्यवसायः साध्यः अत।
श्च व्यापारप्राधान्ये सिद्धो यत्र विषयिणो वस्तुतोऽसत्यस्यापि सत्यतया प्रतीतिः सत्यत्वं च
पूर्वकस्यासत्यत्वनिमित्तस्याभावात् अतश्चाध्यवसितिप्राधान्ये तत्र सत्यत्वप्रतीतौ व्या
पारप्राधान्येऽध्यवसायः संभावनमभिमानस्तर्क ऊहस्तन्त्रेत्युच्यते इवादिशब्दैरुच्यते
तदेवमप्रकृतगुणक्रियाभिसंबन्धादप्रकृतत्वेन प्रकृतस्य संभावनमुत्प्रेक्षा सा च वा। १२
च्या इवादिशब्दैरुच्यते प्रतीयमाना यत्पुनरिवाद्यप्रयोगः सा च जातिगुणक्रियाद्र।

व्याराणामपहृतानामप्यवसीयत्वेन च चतुर्थाप्रहृतस्यैतद्भेदयोगेपि नैवैचित्र्यमिति
तेन गणितानाः प्रत्येकं च भावाभवाभिमानस्वरूपतया द्वैविध्येऽपि विषयत्वाभेदादेकस्य च प्र
त्येकं निमित्तस्य गुणक्रियाद्रूपत्वेन षोडशभेदानेषां च प्रत्येकं निमित्तस्योपादानानुपा
दानाभ्यां द्वात्रिंशत्प्रकाराः तेषु च प्रत्येकं हेतुस्वरूपफलात्मकत्वात्त्रिरूपत्वेन षण्णवति
भेदाः एषां गतिवैचित्र्यात्मिकत्वाद्याः तत्रापि द्रव्यस्य प्रायः स्वरूपोत्प्रेक्षणामेवेति हेतुफला
त्प्रेक्षाभेदात्ततः यावन्तीयाः प्रतीयमानायाश्च यद्यपि उद्देशात एवमावेतोभेदात्तथापि
निमित्तस्यानुपादानेन तस्यानसंभवतीति तैर्भेदैर्भिन्नो यः प्रकारः श्वाद्यनुपादाने निमित्त
स्य चाकीर्तने उत्प्रेक्षायास्य निष्प्रमाणकत्वात् प्रायशः स्वरूपोत्प्रेक्षात्र न भवति तदेव प्र
तीयमानोत्प्रेक्षाया यथासंभवं भेदनिर्देशः एषा चार्थाश्रयापि धर्मविषये श्लेषशब्दहे
तुकापि क्वचिद्दृश्यते क्वचित्पदार्थान्वयवेलायां साम्यरूपाभिधानादुपक्रान्तापि उपमा वा।
क्यार्थेनात्यर्थसामर्थ्यादभिमतव्यापारोपारोहक्रमेणोत्प्रेक्षायां पर्यवस्यति क्वचित्स्फुला

दिशब्दप्रयोगेसायद्भवोत्प्रेक्षाभवति अतश्चोक्तवक्ष्यमाणप्रकारवैचित्र्येणानन्त्यमस्याः
साप्रतन्नइयंदिंमात्रेणोदाह्रियते तत्रजात्युत्प्रेक्षा यथा सवःपायादिन्दुर्नवबिसलता
अ॰ल॰ कोटिकुटिलः स्मरारेर्योमूर्ध्निज्वलनकपिशेभातिनिहितः स्रवन्मन्दाकिन्याः प्रतिदि
स॰ वसमसिक्तेनपयसाकपालेनोन्मुक्तःस्फटिकधवलेनाङ्कुरइव अत्राङ्कुरशब्दस्यजाति
१३ शब्दाज्जातिरुत्प्रेक्ष्यते क्रियोत्प्रेक्षायथा लिंपतीवतमोऽङ्गानिवर्षतीवाञ्जनंनभः अस
13 त्पुरुषसेवेवदृष्टिर्निष्फलतांगता अत्रलेपनवर्षणाक्रियेतमोनभोगतत्वेनोत्प्रेक्षिते
गुणोत्प्रेक्षायथाएषास्थलीयत्रविचिन्वतात्वांभ्रष्टंमयानूपुरमेकमुर्व्याम् अदृश्य
तत्वच्चरणारविंदविश्लेषदुःखादिवबद्धमौनम् अत्रदुःखंगुणः द्रव्योत्प्रेक्षायथा
पातालमेतन्नयनोत्सवेनविलोक्यशून्यंशशलाञ्छनेन इहाङ्गनाभिःस्वमुखच्छले
नकृतंविवेचंद्रमयीवसृष्टिः अत्रचंद्रस्यैकत्वाद्द्रव्यत्वम् एतानिभावाभिमानेनोदाहृ १३
तानि अभावाभिमानेयथा कपोलफलकावस्याःकष्टंभूत्वातथाविधौ अपश्यंपता

विवान्योन्यमीदृक्षोऽहामनंतागतो अत्रापह्नवस्य नाविति क्रियायाश्च भावाभिमानः एवं जात्या
दावभ्यूह्यम् गुणस्य निमित्तत्वं यथा नवबिसलताकोटिकोमलस्येत्याद्युदाहृते तु कोमला
त्वस्य क्रियाया यथा ईदृशोऽहामनंतागतानविनिश्चत्रामनोगमनस्यापह्नवे निमित्तिनोपादा
नस्योदाहरणे अनुपादानेऽलिंपतीव तमोंगानि इत्याद्युदाहरणाम् हेतूत्प्रेक्षा यथा वि
श्लेषदुःखादिव बद्धमौनमित्यादौ स्वरूपोत्प्रेक्षा यथा उर्वरज्यं दिशमुल्लसद्वैमांगंतुं प्रा
हृते समये विलेख्य दिग्गहिराणांगेय वह्नेः स्त्रेखनव्यलीकनिश्वासमिवात्मसत्रं फलो
त्प्रेक्षा यथा चोलस्य यद्भीतिपलायनस्य भालत्वचं कंटकिनो वनांताः अद्यापि किं वान
भविष्यतीति विपाटयन्त्यक्षरमिवाक्षराणि एवं वाच्योत्प्रेक्षाया उदाहरणादिग्दत्ता प्रती
यमानोत्प्रेक्षा यथा महिलासहस्सभरिए तुह हिअए सुहअ सा अमाअंती दिअसं अणण्णकम्मा अंस
अंगं तणुअं पि तणुएइ इत्यत्र अमांतीत्यवर्तमानावेति न न तु करणाहितत्वेनोत्प्रेक्षितम्
एवं भेदांतरेष्वप्यूह्यम् श्लिष्टशब्दहेतुका यथा अनन्यसामान्यतया प्रसिद्धस्त्यागी तिरी

न्तोऽजगतीतलेयः अभूदहंपूर्विकया गतानामितीव भ्रमिः स्मरमार्गणानाम् अत्र धर्मविष
येमार्गणशब्दः श्लिष्टः उपक्रमोऽस्य द्वा यथा कल्लवीतिलकेतिभालफलकेद्व्याम्या
अ·ल· स· १५ एवं भोरुहे योऽलंभन्तिनमालबालमकुलोत्तंसन्ति मौलावपि यः करौ विकचोत्पलेति
उ. चयोरेके च कालागुरुकस्यासंतिप्रच्ययेन तालनवशिवं श्रीकंटकेटन्विषः अत्र यस्य
यि सर्वप्रातिपदिकेभ्यः क्विबित्युपमानात्क्विब्विधानामखे उपमाप्रतीतिस्तथाप्युपमा
नस्य प्रह्नुते संभवोऽस्थित्यात्संभावनोत्थाने उत्प्रेक्षायां पर्यवसानम् यथावा विरहवशा
नेकेयुराघितमेगेंदेरित्यादौ समस्तोपमाप्रतिपादिकविषयेऽपिह्नूषिच्चरितवार्तिकेसा
दित्यमीमांसायां चैतेषु तेषु पदेषूदाहृतानां रूपनेन्द्रह ग्रंथविस्तरभयान्न प्रपंचिता सा
पह्नवोत्प्रेक्षा यथा गतासु तीरं तिमिघट्टनेन ससंभ्रमं पौरविलासिनीषु यत्रोल्लसत्फे
नततिच्छलेन मुक्ताट्टहासेव विभाति सिप्रा अत्रैवमहात्म्यासंभावनाच्छलशब्दप्रयो १५
गाच्चापह्नवोगम्यते एवं व्याजादिशब्दप्रयोगेपिज्ञेयम् अपरश्च वाक्यशासन इत्यादौ

14

अपरशब्दाप्रयोगे उपमैवेयं तत्प्रयोगे तु प्रकृतस्य राज्ञः पाकशासनत्वप्रतीतावध्यवसा
यस्य संभवादिवशब्देन च तस्य साध्यत्वप्रतीतेरुत्प्रेक्षैवेयम्. इवशब्दाप्रयोगे तु सिद्धत्वाध्य
वसायस्यातिशयोक्तिः अपरशब्दस्याप्रयोगे तु रूपकम्. तदेवं प्रकारवैचित्र्येणावस्थि
तायां उत्प्रेक्षायां हेतूत्प्रेक्षायां यस्य प्रकृतसंबन्धिनो धर्मस्य हेतुत्वमुत्प्रेक्ष्यते स धर्मस्त्वध्य
वसायवशादभिन्नत्वेनोत्प्रेक्षानिमित्तत्वेश्रीयते स च वाच्य एव नियमेन भवति अन्यथा कं प्र
ति मे हेतुः स्यात्. यथा अपशंसनाविवान्योन्ये इत्यादावत्र कपोलयोः संबन्धित्वेनोपात्त।
स्य हासमनागमनस्य हेतुरदर्शनमुत्प्रेक्षितं हेतुफलं हासमनागमनेनात्र निमित्तम्.
एवं अदृष्टपतत्त्वच्चरणारविंदविक्षेपदुःखादिव बहुमौनमिति अत्र तु प्रगतस्य मौनि
त्वस्य हेतुर्दुःखितत्वं उत्प्रेक्षितं मौनित्वमेव निमित्तं ज्ञेयं एवं सर्वत्र स्वरूपोत्प्रेक्षायां यत्र ध
र्मी धर्मान्तरगतत्वेनोत्प्रेक्ष्यते तत्र धर्मो निमित्तम्भवतः क्वचिन्निर्दिश्यते यथा सर्वः पायादि।
दुरित्यादौ अत्र तु रिलत्वादि निर्दिष्टमेव मेलेव सागरस्येत्यादौ तु संक्षोभकारित्वादिगम्य

मानम् यत्र धर्मस्य धर्मिगतत्वेनोत्प्रेक्ष्यते तत्रापि निमित्तस्योपादानानुपादानाभ्यां द्वैवि-
ध्यम् उपादाने यथा प्राप्याभिषेकमेतस्मिन्नितिनिश्वासनिद्विषाम् चकंपे लोकमानाम्बा
अ.ल. भयविह्वलितेव भूः अत्र भूतत्वेन विह्वलिताख्यधर्मोत्प्रेक्षायां कंपादि निमित्तमुपात्तम्
स. अनुपादाने यथा लिंपतीव तमोंगानि इत्यादि अत्र तमोगतत्वेन लेपनादिक्रियाकर्तृत्वो-
१५ त्प्रेक्षायां व्यापनादि निमित्तं गम्यमानम् व्यापनादौ तूत्प्रेक्षाविषये निमित्तमन्यदन्वेष्यं
15 स्यात् नच विषयस्य गम्यमानत्वं युक्तं तस्योत्प्रेक्षिताधारत्वेन प्रस्तुतस्याभिधानमुचिता-
त्वात् तस्माद्यथोक्तमेव साधु फलोत्प्रेक्षायां यदेव तस्य कारणं तदेव निमित्तम् तस्यानु-
पादेयत्वं कस्यचित्फलत्वेनोक्तं स्यात् तस्मात्तत्र निमित्तस्योपादानमेव प्रकारान्तरम् यथा
रथस्थितानां परिवर्तनाय पुरातनानामिव वाहनानाम् उत्पत्तिभूमौ तुरगोत्तमानां दि-
शि प्रतस्थे रविरुत्तरस्याम् अत्र परिवर्तनफलस्योत्तरदिग्गमने कारणमेव निमित्तमुपा- १५
त्तम् तदस्या उत्प्रेक्षायाः कल्पाविभागः प्रचुरः स्थितोपि लक्ष्ये तु स्वयमारभ्यादिह प्रपंचि

तः अस्याश्चेवादिशब्दवन्मन्येशङ्कप्रयोगो वितर्कमेव प्रतिपादयति यथोदाहृते प्राक्
सर्पिहितिहेतुमन्योरित्यादिपद्यमध्यवसायस्य साध्यतायामुत्प्रेक्षां निर्णीयसिद्धत्वे तिशयोक्तिं
लक्षयति अध्यवसितप्राधान्ये त्वतिशयोक्तिः अध्यवसाये त्रयं भवति स्वरूपं विषयो
विषयी च विषयस्य हि विषयान्तर्निगीर्णत्वे अध्यवसायस्य स्वरूपोत्थानम् तत्र साध्य
त्वे स्वरूपप्राधान्यं सिद्धत्वे अध्यवसितप्राधान्यं विषयप्राधान्ये त्वध्यवसाये नैवं संभवति अ
ध्यवसितप्राधान्ये त्वतिशयोक्तिः अस्याश्च पंच प्रकाराः भेदे अभेदः अभेदे भेदः संबं
धे असंबंधः असंबंधे संबंधः कार्यकारणयोः पौर्वापर्यविध्वंसश्च तत्र भेदे अभेदो य
था कमलमनंभसि कमले च कुवलये तानि कनकलतिकायाम् सा च सुकुमारसु
भगेत्युत्पातपरंपरा केयम् अत्र मुखादीनां कमलाद्यैर्भेदे प्यभेदः अभेदे भेदो यथा अ
ण्णं लडहत्तणमण्णच्चिअ कावि वत्तणच्छाया सामा सामण्णपयावइणो रेह च्चिअ णहोइ अ
त्र लडहत्वादीनामभेदेप्यन्यत्वेन भेदः यथा वा राणारामरणाति पौरराणामवस्थाग्रहसिति

वल्लहोनिहतहरणीहिंवाम्याहिंउणाकोउहल्लेणापमेअसम्युविद्रो अत्राभिन्नस्यापिविषय
विभागेनभेदोपनिबंधः संबंधेअसंबंधोयथा लावण्यद्रविणव्ययोनगणितःक्लेशोम
अ·ल· हान्स्वीकृतः स्वच्छंदस्यसुखंजनस्यवसतःचिंताज्वरोनिर्मितः एषापिस्वयमेवतुल्य
स रमणाभावाद्वराकीहताकोर्थः चेतसिवेधसाविनिहितास्तन्व्यास्तनुंतन्वता अत्रला
१६ वण्यद्रविणव्ययस्यसंबंधेप्यसंबंधः तन्वीलावण्यप्रकर्षप्रतिपादनार्थंनिबद्धः य॰
16 थावा अस्याःसर्गविधौप्रजापतिरभूच्चंद्रोनुकांतिप्रदः शृंगारैकरसःस्वयंनुमदनोमा
सोनुपुष्पाकरः वेदाभ्यासजडःकथंनुविषयव्यावृत्तकौतूहलोनिर्मातुंप्रभवेन्मनोह
रमिदंरूपंपुराणोमुनिः अत्रपुराणप्रजापतिनिर्माणसंबंधेप्यसंबंधउक्तः असंबंधे
संबंधोयथा पुष्पंप्रवालोपहितंयदिस्यान्मुक्ताफलंवास्फुटविद्रुमस्थम् ततोनुकु
र्याद्विशदस्यतस्यास्ताम्रौष्ठपर्यस्तरुचःस्मितस्य अत्रसंभावनयासंबंधः अथवा दा १६
होम्भःप्रसृतिंपचःप्रचयवान्बाष्पःप्रणालोचितःश्वासाःप्रेंखितदीप्रदीपलतिकाः

पोरिउन्निमग्नवपुः किंचान्यत्कथयामि रात्रिमखिलां त्वन्मार्गवातायने हस्तच्छत्रनिरुद्ध
चन्द्रमहसस्तस्याः स्थितिर्वर्तते अत्र तापादीनामसंभवः प्रस्तुताद्येव संबंधेपि संबंधः सिद्धोवि
नोक्तः कार्यकारणयोः पौर्वापर्यविध्वंसः पौर्वापर्यविपर्ययात्तुल्यकालत्वाद्वा विपर्य
योयथा हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन चरमं रमणीवल्लभलोच
नविषयं त्वया भजता तुल्यकालत्वं यथा अविरलविलोलजलदः कुटजार्जुननीप
सुरभिवनवातः अयमायातः कालो हन्त हताः पथिकगेहिन्यः एषु च पंचसु भेदेषु भे
देऽभेदादिवचने लोकातिक्रान्तगोचरम् अत्र चातिशयाख्यं यत्फलं प्रयोजकत्वान्नि
मित्तम् तत्र भेदाध्यवसायः तथाहि कमलमनेभसीत्यादौ वदनादीनां कमलाद्यैर्भेदेपि
वास्तवे सौंदर्यकविसमर्पितेन सौंदर्येणाभेदेनाध्यवसितं भेदेऽभेदवचनस्य निमित्तमन
ध्यवसितोऽध्यवसायः इत्यध्यवसितप्राधान्येन तद्वदनादीनां कमलादिभिरभेदाध्यवसा
योयोजनीयः अभेदे भेद इत्यादिषु प्रकारेष्वप्यमेः तत्र हि अण्णं लडअत्तणअं इत्या

अ॰ल॰ स॰ १८ 17

दिसानिष्पायेलटभात्वं निमित्तभूतं भेदेनाध्यवसितं एवमन्यत्रापि ज्ञेयम् प्रकारपंचकमध्यात्का
र्यकारणाभावेन यः प्रकारः स कार्यकारणतानाश्रयालंकारप्रस्तावप्रपंचेन लक्षयिष्यते एव
मध्यवसायाश्रयेणालंकारद्वयमुक्त्वा गम्यमानौपम्याश्रया अलंकारा इदानीमुच्यन्ते तत्रा
पि पदार्थवाक्यार्थगतत्वेन तेषां द्वैविध्ये पदार्थगतमलंकारद्वयमुच्यते औपम्यस्य गमत्वेप
दार्थगतत्वेन प्रस्तुतानामप्रस्तुतानां वा समानधर्माभिसंबंधेन तुल्ययोगिता इवाद्यप्रयोगेऽौप
म्यस्य गम्यत्वम् तत्र प्राकरणिकानामप्राकरणिकानां वा समानगुणक्रियाभिसंबंधेऽन्विता
र्था तुल्ययोगिता यथा सञ्जातपत्रप्रकरान्वितानि समुद्वहन्ति स्फुटपाटलत्वम् विकस्वराण्य
र्ककरप्रभावाद्दिनानि पद्मानि च वृद्धिमीयुः अत्रर्तुवर्णनस्य प्रक्रांतत्वाद्दिनानां पद्मानां च
प्रकृतत्वम् वृद्धिगमनं क्रिया एवं गुणेऽपि योगपट्टो जटाजालं तारवीत्वमृगाजिनम् उचि
तानि तवांगेषु यदद्य नितदुच्यताम् अप्राकरणिकानां यथा धावत्त्वदश्वपृतनापतितं नरेवस्य १८
निर्भिद्य नीलनलिनस्फुटकोमलांगया भग्नस्य गर्जरस्य पस्य रजः कयापि तद्यातवासिलतया

चयशाः प्रस्तुतम् अत्र गर्जने प्रतिनायिकासलिलनयोरप्राकरणिकत्वमार्जनेन क्रिया गुणो

यथा त्वदंगमार्दवे दृष्टे कस्य चित्ते न भासते मालतीशशभृल्लेखाकदलीनां कठोरता अ

त्र कठोरत्वं गुणः एवमेषा चतुर्विधा व्याख्याता प्रस्तुताप्रस्तुतयोर्व्यस्तत्वेन तुल्ययोगितां

प्रतिपाद्य समस्तत्वे दीपकमुच्यते प्रस्तुताप्रस्तुतानां तु दीपकम् औपम्यस्य गम्यत्वे इत्या

द्यनुवर्तते प्राकरणिकाप्राकरणिकयोर्मध्यादेकत्र निर्दिष्टः समानो धर्मः प्रसंगेनान्यत्रोप

कारादीपनाद्दीपसादृश्येन दीपकाख्यालंकारोऽन्यापकः तत्र एवाद्यप्रयोगादुपमानोपमे

यभावो शास्यमानः सच वास्तवएव पूर्वत्र शुद्धप्राकरणिकत्वे शुद्धाप्रकरणिकत्वे वा वैव

क्षिकः प्राकरणिकत्वाप्राकरणिकत्ववर्तितत्वादुपमानोपमेयभावस्यानवसेयवक्ति

याभिसंबंधादेश्चित्यान्न दार्ष्टान्तिकः वस्तुतस्तु वाक्यार्थत्वे आदिमध्यान्तवाक्यान्तत्वेन ध

र्मस्य वृत्तावादिमध्यान्तदीपकाख्यास्त्रयोस्य भेदाः क्रमेणोदाहरणम् रेहमिहिरेणारा

हरसेरणावध्वंसरेणोजोहरणोऽस्मभयप्राप्तुनीयवल्लोलमणरावणाहृभुवणाभिरामसं

चारपूतानि दिगंतराणि कृत्वा दिनांते निलयाय गंतुम् प्रचक्रमे पल्लवरागताम्रा प्रभा पतं-
अ॰ल॰ गस्य मुनेश्च धेनुः किंवणितांपवितांरणाञ्चारांकराणमरीकेसरा रसीहारां कुलवालि-
स॰ काणायणाश्चाकलहंसपंक्तिश्चामस्याराा एवमेकक्रियंदीपकद्वयमभिहितमिति अत्र च यथा
१८ अनेककारकगतत्वेन एकक्रियं दीपकं तथा अनेकक्रियागतत्वे एककारकमपि दीपकं
18 यथा साधनाम एककं लक्ष्मीपतेर्विहायसा गंतुम् तत्कुतूहलिकस्य मनस्स्फुरितं च मा-
हात्मनोश्रोतुम् अत्रोपकारणाद्यनेकक्रियाकर्तृत्वेन कुतूहलविशिष्टं मनो निर्दिष्टम्
क्रियांतरेण मालादीपकं प्रस्तावांतरे लक्षयिष्यते वाक्यार्थगतत्वेन सामान्यस्य वाक्या-
द्वये पृथङ्निर्देशे प्रतिवस्तूपमा पदार्थपूर्वो वाक्यार्थ इति पदार्थगतालंकारानंतरं वा-
क्यार्थगतालंकारप्रस्तावः तत्र सामान्यधर्मस्य इवाद्युपादानेन सकृन्निर्देशे उपमा वस्तु-
प्रतिवस्तुभावेन सकृन्निर्देशोपि सैव इवाद्यनुपादानेन सकृन्निर्देशे दीपकतुल्ययोगिते अ- १८
सकृन्निर्देशे तु शुद्धसामान्यरूपत्वे बिंबप्रतिबिंबभावे वा आद्यः प्रकारः प्रतिवस्तूपमा

वस्तुनः शब्दस्य वा वाक्यार्थस्य वा चित्ते प्रतिवाक्यार्थमुपमासाम्यमित्यनर्थान्तरग्रहणात् केवलं
काव्यममयान्यर्थायांतरेणापृथङ्निर्देशाद्द्वितीयप्रकाराश्रयेणा दृष्टांतो वक्ष्यते तदेवमौ
पम्याश्रयेणैव प्रतिवस्तूपमा यथा चकोर्य एव चतुराः चंद्रिकाचामकर्मणि आवंत्या
एव निपुणाः सुदृशो रतकर्मणि अत्र चतुरत्वं साधारणो धर्मः उपमानवाक्ये निपुणप
देन निर्दिष्टः न केवलमियं साधर्म्येण यावद्वैधर्म्येणापि यथा चैव उत्तरार्धस्याने विनाव
न्तीर्निपुणाः सुदृशो रतनर्मणि पाटवे तस्यापि बिंबप्रतिबिंबतया निर्देशे दृष्टान्तः तस्या
पि न केवलमुपमानोपमेययोस्तच्छब्देन सामान्यधर्मप्रत्यवमर्शः आद्यो यथा अब्धि
र्लंघित एव वानरभटैः किंत्वस्य गंभीरतामापातालनिमग्नपीवरतनुर्ज्ञानाति मंथाचलः
देवीं वाचमुपासते हि बहवः सारं तु सारस्वतं जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारि
कविः अत्र यद्यपि ज्ञानाख्य एको धर्मो निर्दिष्टः तथापि तेन लंघनं वेधनमौपम्ये विवक्षितं यत्रि
वेधनं च विवक्षितं तत्राद्यः लंघनादावक्षेपवदिव्यवाग्गुपासनादिना प्रतिबिंभः द्वि

तीयोयथा इतेचगर्वाभिमुखेमनस्त्वयाकिमन्यदेवंनिहताश्चनोरयः तमांसितिष्ठंति।
हितावदंशुमान्नयावदायात्युदयाद्रिमौलिताम् अत्रनिहतत्वादेःस्थानादिनावैधर्म्ये
अ॰ल॰ स॰ णप्रतिबिंबनम् संभवताऽसंभवतावस्तुसंबंधेनगम्यमानंप्रतिबिंबकरणंनिदर्शना
१९ प्रतिबिंबप्रस्तावेनास्यालक्षणमत्रक्वचित्संभवन्नेववस्तुसंबंधः स्वसामर्थ्याद्बिंबप्रति
19 बिंबभावंकल्पयति क्वचित्पुनरन्वयबाधादसंभवतावस्तुसंबंधेनप्रतिबिंबनमाक्षि
प्यते तत्रसंभवद्वस्तुसंबंधायथा चूडामणिपदेधत्तेयोदेवंरविमागतम् सतांकार्या
तिथेयीतिबोधयन्गृहमेधिनः अत्रबोधयन्नितिणिचनत्समर्थाचरणप्रयोगात्संभव
ति वस्तुसंबंधः असंभवद्वस्तुसंबंधायथा आव्यात्सवोयस्यनिसर्गवक्रःस्पृशत्यधि
ज्यस्मरचापलीलांजटापिनद्धोरगराजरत्नमरीचिलीढोभयकोटिरिंदुः अत्रस्मरचा
पसंबंधिन्यालीलयावस्त्वंतरभूतेनेंदुनास्पर्शनमसंभवल्लीलासदृशींलीलामेवा। १९
गमयतीत्यनयोरविप्रकर्षात्प्रतिबिंबकल्पनमस्याः पदार्थवाक्यार्थवृत्तिभेदाद्वि

या पदार्थवृत्तिः समनेतत्स्मदाहृता वाक्यार्थवृत्तिर्यथा त्वत्पादनखरत्नानां यदलक्तक
मार्जनम् इदं श्रीखंडलेपेन पांडुरीकरणं विधोः किंचिद्दृष्टान्तालंकारो य इत्यूषः तदस
त् निरपेक्षयोर्वाक्यार्थयोर्हि बिंबप्रतिबिंबभावो दृष्टान्तः यत्र प्रकृतेन वाक्यार्थेन वाक्या
र्थान्तरमारोप्यते समानाधिकरण्येन तत्र संबंधानुपपत्तिमूला निदर्शनेव न दृष्टान्तः ए
वेव प्रकृताद्दुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य दूरीकृताः खलु गुणैरुद्यानलता व
नलताभिः इत्यत्र दृष्टान्तबुद्धिर्न कार्या उक्तन्यायेन निदर्शनाप्रामेः इयं च सामान्येनोपमा
नेनोपमानत्वस्य उपमेये संभवान्प्रतिपादिता उपमेयत्वस्योपमाने संभवादपि भव
ति उभयत्रापि संबंधविघटनास्य विद्यमानत्वात् तद्यथा वियोगे गौरनारीणां यो गंडतल
ल पाण्डिमा स्फुटं सरसखर्जूरीमंजरीगर्भरेणुषु अत्र गंडतलप्रकृतेर्पाण्डिम्नः खर्जूरीरेणुषु
संभवादौपम्यप्रतीतिः एष च प्रकारः श्रृंखलान्यायेनापि भवति यथा मंदस्मितेशेवरफलं
योरावविवेरष्टंशमपि रेयरस्मि विमुग्धा वसिन्नपूयारणालिस्रवे वमाच्छलिजाति कश्चित्स

नन्निषेधसामर्थ्यादाक्षिप्तायाः प्राप्तेः संबंधानुपपत्त्या भवति यथा नत्कोपि त्वयि किंचि-
देव चलति द्रागुर्जरक्ष्माभृतामस्ताभर्नेपरं भयात्मरुज्ज्वषां यावत्तदराजीक्षणाम् पङ्क्ती
अ.ल. हंसगतिर्मुखेन शशिनः कान्तिश्च ताभ्यामपि ह्रीताभ्यां सह हंसैर्वनमध्यवर्तिरोलंभस्य
सू. लीविभ्रमः अत्र नञ्केति निषेधपदं तदन्यथानुपपत्त्या पादयोः हंसगतिप्राप्तिराक्षिप्य-
२ 20 ते सा च तयोरनुपपद्यमाना तत्सादृश्यं गमयतीति असंभवद्वस्तुसंबंधनिबंधना निदर्श-
ना भेदप्राधान्ये उपमानादुपमेयस्याधिक्ये विपर्यये वा व्यतिरेकः अधुना भेदप्राधान्येना-
लंकारकथने भेदे वैलक्षण्यं स च द्विधा भवति उपमानादुपमेयस्याधिकगुणत्वविप-
र्यये वाभावात् विपर्ययो न्यूनगुणत्वं क्रमेणोदाहरणम् हृद्यस्तवः पद्मलताविला-
समहत्त्वात्सहस्रयमनोहरं नेत्रवापीप्रलीलोत्पलिनीविकासवस्यासमुन्नदं तिनवहृत्पदौघाः
ह्रीणाः ह्रीणोऽपि शशी भयोद्विवर्धते सत्यम् विरम प्रसीद सुन्दरि यौवनमनिवर्तियातं २
न अत्र विकस्वरनीलोत्पलिन्यपेक्षया अक्षि सहस्रस्य पद्मलतायाश्चाधिकगुणत्वम्

चेद्दृष्टिस्तयाच यौवनस्यस्त्रनयुग्मात्वम् शशिवेलद्दृशोपनगतस्यापुनरागमान् उपमा।
नोपमेययोरेकस्यप्राधान्यनिर्देशोपरस्यसहार्थसंबंधेसहोक्तिःभेदप्राधान्येशत्यैवगुणा
प्रधानभावनिमित्तकमत्रभेदप्राधान्यं सहार्थप्रयुक्तस्यगुणाप्रधानभावः उपमानोप
मेयत्वंचात्रवैवक्षिकम् द्वयोरपिप्राकरणिकत्वादप्राकरणिकत्वाद्वासहार्थसामर्थ्या
द्भातयोस्तुल्यकक्ष्यत्वेनत्रनतीयोनस्यनियमेनगुणाभावादुपमानत्वंप्रधानत्वेविशि
ष्टस्यप्रधानत्वादुपमेयत्वम् शब्दस्यात्रगुणाप्रधानभावःवस्तुतस्तुविपर्ययस्यात् नत्र
नियमेनातिशयोक्तिमूलत्वमस्याःसाचकार्यकारणप्रतिनियमविपर्ययरूपा यथा
भवदपराधेःसार्धंसंतापोवर्धतेतरांतस्याः इयमेतिसमंवराकीस्तेहेनसमंत्वदीयेना।
अत्रापराधानांसंतापेप्रतिहेतुत्वेपितुल्यकालत्वेनोपनिबंधः श्लेषभित्तिकाध्यवसाय
मूलायथा अस्तंयातोविवस्वानस्तंहविषुभिरर्थसंस्तूयेतेनोवलानि अत्रास्तंगमनेश्लिष्ट
स्तमितस्याभयार्थत्वात् नदन्यथात्रयायथा उमरदवेनेःसहस्वंप्रतिविघटतेचक्रवाक

भिन्नानि अत्र विघटनसंबंधिभेदाद्विवंतनतश्चित्रम्. एतद्विशेषणापरिहारेण न सहोक्ति
मात्रेणालंकारः यथा अनेन सार्द्धं विहराम्बुराशेस्तीरेषु तालीवनमर्मरेषु इत्यादौ एतावा
अ. ल. न कर्तृसाहित्ये उदाहरणानि कर्मसाहित्ये यथा युञ्जनामसु नासार्थं यस्याञ्जातो रथा
सू. मेये चक्रेश्च चक्राभियानेन प्रेष्यरणाश्रमनोरथः अत्राकरोति क्रियापेक्षया युञ्जनस्य
२१ 21 कर्तृत्वात्कर्मत्वम्. एषा च मालयापि भवति यथा उक्तिं संप्रति कौशिकस्य पुलकैः सा
र्धमुत्तरैव नामिते भ्रूयानोज्जनकस्य संशयधिया सार्धं समास्फालिते वैदेह्या मनसा समं च
सहसा हृष्टं ततो भार्गवप्राढाहंकृतिकल्लेन च समं नद्धं ग्रैमेशं धनुः सहोक्तिप्रतिभ्
तां विनोक्तिं लक्षयति विना किंचिदन्यस्य सदसत्त्वाभावे विनोक्तिः सत्त्वस्य शोभनत्वस्या
भावः अशोभनत्वम् ते ह्ययत्र कस्यचिदसन्निधानान्निबध्येते सा द्विधापि विनोक्तिः।
अत्र शोभनत्वाशोभनत्वसत्त्वयोरेव वक्तव्यायामस्यामरवेनाभिधानस्यानिवृत्तिप्रयु। २१
क्ता तन्निवृत्तिरिति ख्यापनार्थमेव तदन्यनिवृत्तेर्विधिरेव प्रकाशितो भवति आयाय

था विनयेन विना का श्रीः का निशा शशिना विना रहिता सत्कवित्वेन कीदृशी वाग्विदग्ध
ता अत्र विनयाद्यसन्निधिप्रयुक्तश्र्यादिविरहाद्यभिधानमुखेनाशोभनत्वमुक्तम्। अत्र विना
शब्दप्रयोगमन्तरेणापि तदर्थविवक्षा यथा कश्चिन्निमिलीभवति यथा सहोक्तौ सहार्थ
विवक्षा एवं च निरर्थकं जन्म गतं नलिन्या यया न दृष्टं तुहिनांशुबिम्बम्। उत्पत्तिरिन्दोर
पि निष्फलैव दृष्टा प्रबुद्धा नलिनी न येन इत्यादौ विनोक्तिरेव तुहिनांशुदर्शनं विना नलि
नीजन्मनोऽशोभनत्वप्रतीतेः इयं च परस्परविनोक्तिभङ्ग्या चमत्कारातिशयकृत्। यथोदा
हृते विषये द्वितीया यथा मृगलोचनया विना विचित्रव्यवहारप्रतिभाप्रभाप्रगल्भः
अमृतद्युतिसुन्दराशयोऽयं सुहृदा तेन विना नरेन्द्रसूनुः अत्राशोभनत्वाभावः शोभनप
दार्थभङ्ग्या उक्तः सेषा द्विधा विनोक्तिः अधुना विशेषणविच्छित्त्याश्रयेणालंकारद्वया।
मुच्यते तत्रादौ विशेषणसाम्यावष्टम्भेन समासोक्तिमाह विशेषणसाम्यादप्रस्तुतस्य ग
म्यत्वे समासोक्तिः इह प्रस्तुताप्रस्तुतानां क्वचिद्वाच्यत्वं क्वचिद्गम्यत्वमिति त्रैविध्यम्। वा

यत्रैव श्लेषनिर्देशे भंगपाठश्च गुणादानेन वा इत्यपि द्वैध्यं एतद्धि भेदमपि श्लेषालंकारस्य वि-

अ·ल· स· २२ षयः गम्यत्वेन प्रस्तुतनिष्ठमप्रस्तुतप्रशंसाविषयं अप्रस्तुतनिष्ठत्वं समासोक्तेर्गोचरस्तत्र

च निमित्तं विशेषणसाम्यं विशेष्यस्यापि साम्ये श्लेषप्राप्तेः विशेषणसाम्याद्धि प्रतीयमानम-

प्रस्तुतं प्रस्तुतस्यावच्छेदकत्वेन प्रतीयते अवच्छेदकत्वाच्च व्यवहारसमारोपः रूपसमा-

रोपे त्ववच्छादितत्वेन प्रकृतस्य तद्रूपत्वापि तद्रूपकम् न च विशेषणसाम्यश्लिष्टतया साधा-

रणेन तद्वोपस्यगर्भत्वेन च भवति यथा भवति तत्र श्लिष्टतया यथा उपोढरागेण विलोलतार-

केन यथा गृहीतं शशिना निशामुखम् यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद्गलितं।

लक्षितम् अत्र निशाशशिनोः श्लिष्टविशेषणमहिम्ना नायिकानायकव्यवहारप्रतीय-

तेः अपरित्यक्तस्वस्वरूपयोः निशाशशिनोः नायिकात्वाद्यर्थविशिष्टयोः प्रतीतेः साधा-

रणेन यथा तन्वी मनोरमा बाला लोलाक्षी पुष्पहासिनी विकासमेति सुभगा भवद २२

र्शनमात्रतः अत्र तन्वीत्वादिविशेषणसाम्याल्लोलाक्ष्या लतया व्यवहारप्रतीतिः नत्र चल

नेक्षणाभिविकस्वरत्वधर्मसमारोपः कारणम् अन्यथा विशेषणसाम्यमात्रेणानियत
स्य चलनादिव्यवहारस्य प्रतीतेः विकासस्य प्रकृतः उपचरितो ज्ञेयः एवं कार्यसमारोपो।
पि ज्ञेयः इयं समासोक्तिः पूर्वोपदर्शितायाश्च सिद्धा उपमागर्भत्वेन यथा दंतप्रभापुष्पचि।
तया पाणिपल्लवशोभिनी केशपाशालिवृंदेन सवेषा हरिणीक्षणा अत्र दंतप्रभापुष्पा
णीवेति सवेषत्ववशादुपमागर्भत्वेन कृतेन समासेन पश्चाद्दंतप्रभासदृशैः पुष्पैः चितेति
समासांतराश्रयेणेन समासविशेषणमाहात्म्यात् लताव्यवहारप्रतीतिः अत्रैव परीता
पाणिरेणेति पाठे उपमारूपकसाधकबाधकाभावात्संकरसमाश्रयेणाकृतयोजनेन पश्चा
त्पूर्ववत्समासांतरमहिम्ना लताप्रतीतिर्ज्ञेया रूपकगर्भत्वेन तु समासांतराश्रयणात्स
मानविशेषणत्वमभवदपि न समासोक्तिः प्रयोजकमेकदेशविवर्ति रूपकमस्त्वेनेवार्था
न्तरप्रतीतेर्लक्ष्यवैयर्थ्यात् न च पूर्वनिदर्शितोपमासंकरविषयेणैष न्यायः उपमासंकर
योरेकदेशविवर्तिनोरभावात् नैवैकदेशविवर्तिरूपकमश्लेषेणाश्लेषेण च भवतीति हि

विषयम् अश्लिष्टं यथा निरीक्ष्य विद्युन्नयनैः पयोदो मुखं निशायामभिसारिकायाः धारानिपा
तैः सह किन्नु वान्तश्चन्द्रोऽयमित्यार्ततरं ररास अत्र निरीक्षणानुगुणापाद्विद्युन्नयनैरिति निरूप
अ. ल. केः पयोदस्य द्रष्टृपुरुषवद्रूपणामार्ततरं ररासेत्यत्र प्रतीयमानोत्प्रेक्षाया निमित्तत्वं भजते।
स. श्लिष्टं यथा मदनगणनास्थाने लेख्यप्रपंचं मदं च यति च किल दृष्ट्वात्र न्यस्तं द्विरेफम
२२ षीलवैः कुटिललिपिभिः कायस्थेन नाम विमत्रयत्यपि पतिविरहिप्राणापायव्यययाव
धिके मधुः अत्र हि पत्रलिपिकायस्थशब्दे श्लेषगर्भं रूपं द्विरेफमषीलवैरित्यत्र रूपक
निमित्तं अस्य च प्रचुरः प्रयोगविषय इति नात्र समासोक्तिबुद्धिः कार्या तदेवं श्लिष्टविशे
षणसमुत्थापिता धर्मकार्यसमारोपाभ्यां द्विभेदा औपम्यगर्भविशेषणसमुत्थापिता
उपमासंकरसमासाभ्यां द्विभेदा रूपकसमाश्रयेणाभेदद्वयमस्या निविषयः इत्थं
च शुद्धकार्यसमारोपेणाविशेषणसाम्येनउभयमयत्वेन च प्रथमे त्रिधा समासोक्तिः २२
विशेषणसाम्ये च पंचप्रकारेतिरीणीति सर्वत्र चात्र व्यवहारसमारोपएवजीवितम् स च

लौकिकवस्तुनि लौकिकवस्तुव्यवहारसमारोपः। शास्त्रीयवस्तुनि शास्त्रीयवस्तुव्यव
हारसमारोपः। लौकिके वा शास्त्रीयवस्तुव्यवहारसमारोपः शास्त्रीये वा लौकिकवस्तु
व्यवहारसमारोपः इति चतुर्धा भवति तदेवं बहुप्रकारा समासोक्तिः तत्र श्लिष्टकार्य
समारोपे परा यथा विलिखति कुचावुच्चैर्गाढं करोति कचग्रहं लिखति ललिते वक्त्रे पत्रा
वलीमसमञ्जसाम्। क्षितिपखदिरः श्रोणीबिम्बाद्विकर्षति चांशुकं मरुभुवि हठा
न्नार्यः पत्नी नो नव्या विभ्रमतीह शाम्। अत्र पत्रावलीविलेखनादि श्लिष्टकार्यसमारोपः। खदि
रस्य हठकामुकव्यवहारप्रतीतिः विशेषणसाम्यमौदाहृतं उभयमयेन यथा निर्लूना
न्यलकानि पाटितमम्बरः हन्तोष्ठाधरः खंडितः करौ रुक्षतिता कृतं च नयने नीलाञ्जनाक्रान्ते
हातम्। योनीनामतिसंभ्रमाकुलपदन्यासैर्मयैरौनीरसैः किंकिं क — किमिभः इति विशेषणसा
साम्ये निर्लूनान्यलकानीत्यादि श्लिष्टकार्यसमारोपः व्यवहारसमारोपप्रकार च तत्र
ये क्रमेणोदाहरणं यथा ग्रामालिलिङ्ग मुखमाशु दिशां चुचुम्ब रूढा बरेशशिकला मा।

लिखत्कवीन्द्रैः श्रुतनिमग्नचरणयुगशोभितलायन्निति किं चकार न हरणानयदीहरागिणः
लौकिकेचवस्तुरसादिभेदान्नानाभेदस्वयमन्येद्यम् यैरेकरूपमखिलाखपिहतिख्रु।
अ·ल· लायश्चद्भिरव्ययमसंख्यानयाप्रवृत्तम् लोकःकृतःकिलपरत्वजुषाविभक्तैर्लक्ष्म
स· णानवहृतेष्वेवमेवमन्ये अत्रागमशास्त्रप्रसिद्धवस्तुनिव्याकरणप्रसिद्धवस्तुसमारो
२५ पः सीमानंनतुगामयन्नयनयोर्नान्येनयत्संगतंनस्पृष्टं वचसाकदाचिदपियद्दृष्टो
२५ यमानंनयन् अर्थात्प्रापितेनयत्नचनयतात्किंचिदेणीदृशोलावण्यंजयतिप्रमाणा
रहितंचेतश्चमत्कारकृत् अत्रलौकिकेलावण्येमीमांसाशास्त्रप्रसिद्धवस्तुसमारोपः
एवंतर्कायुर्वेदज्योतिःशास्त्रादिप्रसिद्धवस्तुसमारोपाबोद्धव्याः यथा स्वपद्मलीला
लग्नैनकेयोढहेतोस्मरेदर्शयनेविशेषम् मानंनिराकर्तुमशेषसूनोपिकस्ययोगि।
निमखेदमासीत् अत्रतर्कशास्त्रप्रसिद्धवस्तुसमारोपःयोगीत्यशब्दःप्रकृतेलक्षणा २५
षपुष्पं न पुनः पतत्रिणः यद्विस्मयस्तिमितमस्तमितान्यभावमानंदमंदममृत
श्री.ल. प्लवनादिवाभूत् तत्सन्निधौ तदधुना हृदयं मदीयमंगारचुंबितमिव व्यथमा
स. नमास्ते एवं च वरप्राप्तिहेतुभूततपोनिषेधे मनीषिता इति वाक्यार्थरूपो हेतु
४८ र्निर्दिष्टः अत्र च पुनरस्तमितान्यभावमित्यत्र विस्मयस्तिमितमिति विशेषणा
द्वारेण पदार्थः साध्यसाधननिर्देशोऽनुमानम् यत्र शब्देन पक्षधर्मान्वय
व्यतिरेकवत्साधने साध्यप्रतीतये निर्दिश्यते सोऽनुमानालंकारः विच्छित्तिवि
शेषश्चात्रार्थदाश्रयणीयः अन्यथा तर्कानुमानात् किं वैलक्षण्यं तदा य
था रंध्रे व्योम्नश्चलजलदधूमः स्थगयति स्फुलिंगानां रूपं दधति च यथा की ४८
टमणयः यथा विद्युज्ज्वालोल्लसितपरिपिंगाश्च ककुभस्तथा मन्ये लग्नः पथि

तत्कृतकंपेऽङ्गः स्मरदवः अत्र धूमस्फुलिंगकपिलत्वादिकत्वानि वह्निलिंगानि विरूपत्वाद्दवश
ह्रप्रतिपादितेन वह्निं गमयंतीत्यनुमानम् रूपकमलंत्वेतन्नालंकारांतरगर्भीकारे विच्छि
त्त्याश्रयणात्तर्कानुमानेनैव लक्षणीयम् क्वचित्प्रयुक्तमपि भवति यथा यत्रैता लहरीचला
चलदृशो व्यापारयंति भ्रुवं यत्तत्रैव पतंति संततममी मर्मस्पृशो मार्गणाः तच्चक्रीकृता
चापसंहितशरप्रेंखत्करः क्रोधनो धावत्यग्रत एव शासनधरः सत्यं सदास्मात्स्मरः अत्र यो
षितां भ्रूव्यापारेण मार्गणपतनेन स्मरपुरोगामित्वं साध्येनालंकृतमेव साधनमिति शुद्ध
मनुमानम् प्रौढोक्तिमात्रनिष्पन्नार्थनिष्ठत्वेन च विच्छित्तिविशेषाश्रयणाच्चारुत्वम् अ
यमत्रापि शब्दार्थः शब्दाश्रिते प्रत्याय्यप्रत्यायकभावः अर्थे तु च समर्थ्यसमर्थकभावः तत्राप्रतीत
प्रत्यायने प्रत्याय्यप्रत्यायकभावः प्रतीतप्रत्यायनेन तु समर्थ्यसमर्थकभावः तत्र प्रत्याय्यप्र
त्यायकभावेनानुमानम् सामर्थ्यसमर्थकभावेन तु यत्र पदार्थो हेतुस्तत्र हेतुरेनोपादाने ना
गेन्द्रस्तनत्वचिकर्कशत्वादित्यत्र काव्यलिंगालंकारः यत्र तु वाक्यार्थस्य हेतुत्वम् यथोदाहृते

विषयेमगपस्य दर्भाङ्कुरेत्यादौ तेनैवैकं काव्यलिंगम् यत्र तु वाक्यार्थो हेतुस्तत्र हेतुत्वप्रति
पादकमन्तरेण हेतुत्वायोपन्यासे काव्यलिंगमेव न तद्धेतुत्वेनोपन्यस्तस्य तु त्वेनार्थान्तर
अ॰ ल॰ न्यासः एवं चासंभाक्रियायां कार्यकारणवाक्यार्थयोः हेतुत्वे काव्यलिंगमेव पर्य
स॰ वसति सामर्थ्यं वा वाक्यार्थस्य सापेक्षत्वानादस्याभावात् न तस्य सामान्यविशेषभाव
५९ एवार्थान्तरन्यासस्य विषयः यस्त्वन्यैरर्थान्तरन्यासस्य कार्यकारणगतत्वेन समर्थकत्व
59 मुक्तं तदुक्तलक्षणे काव्यलिंगमनाश्रित्य तद्विषयत्वेन लक्षणं तस्योद्भटैरनाश्रितत्वा
न् उक्तलक्षणाश्रयेण तु यत्त्वन्नेत्रसमानकान्तीत्यादिर्विविक्तो विषयः काव्यलिंग
स्यार्थान्तरन्यासाद्दर्शित इति कार्यकारणयोः समर्थ्यसमर्थकत्वमर्थान्तरन्यासस्य
पूर्वं दर्शितमितीयतीगमनिकाश्रयितव्या एवं तर्कन्यायमूलमलंकारद्वयमभि
हृत्य प्रतिपादितम् अधुना वाक्यन्यायमूलालंकारा उच्यन्ते उद्दिष्टानामर्थानां क्र ५९
मेणानुदेशो यथासंख्यम् ऊर्ध्वं निर्दिष्टा उद्दिष्टाः पश्चान्निर्देशोऽनुदेशः स चार्थाद

र्थानवगतः संबंधस्तत्र सामर्थ्यात्प्रतीयते ऊर्ध्वनिर्दिष्टानामर्थानां पश्चान्निर्दिष्टैरा
र्थैः क्रमेणाभिसंबंधो यथासंख्यं इति वाक्यार्थः अन्येत्विममलंकारं क्रमसंज्ञयाभिद
धिरे तस्य यथासंख्यं शाब्दमार्थं चेति द्विधा शाब्दं यत्रासमस्तानां पदार्थैः अथ विहारकः
संबंधः तत्र क्रमसंबंधस्यातिरोहितस्य प्रत्ययत्वात् अर्थं तु यत्र समासः क्रियते त
त्र समुदायस्य समुदायेन सह संबंधस्य शाब्दत्वात्त्वावगमपर्यालोचनेनावगतः
क्रमसंबंधः प्रतीयते तेनात्र यथासंख्यस्यार्थत्वम् आद्यस्योदाहरणम् लावण्यौ
कसि सप्रतापगरिमण्यग्रेसरे त्यागिनां देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेद
सा इंदुः किं घटितः किमेष विहितः पूषा किमुत्पादितो चिंतारत्नमहो मुधैव किम
त्र क्ष्माजलक्ष्माभृतः अत्र लावण्यौकः प्रभृतीनामिंद्वादिभिः क्रमसंबंधस्याव्यव।
हितत्वेन प्रतीतेः शाब्दं यथासंख्यं द्वितीयं यथा कज्जलहिमकनकरुचः सुपर्णवृ
षहंसवाहनाः शं वः जलनिधिगिरिकमलस्था हरिहरचतुराननाददतु अत्र कज्ज

लादीनां सुपर्णादिभिः संबंधानां जलनिध्यादिभिः संबंधे हरिप्रभृतिभिः संबंधः
कृत्यासमुदायनिष्ठः प्रतीयते अत्र यथानुगमानुसरणेन नन्ववयवानां क्रमसंबंधाव
अ॰ल॰ गतिरित्यार्थं यथासंख्यम् एकमनेकस्मिन्ननेकमेकस्मिन्वा पर्यायः क्रमग्रा
स॰ ह्यत्वादिदमुच्यते एकमाधेयमनेकस्मिन्नाधारे यन्निष्ठति स एकः पर्यायः ननु
५॰ 50 एकमनेकगोचरमिति प्रागुक्तेन लक्षणेन विशेषालंकारोऽयमुक्तः तत्किमर्थमिदमु
च्यत इत्याशंक्याह क्रमेणेति इह च क्रमप्रतिपादनाद्यौगपद्यप्रतीतिः।
तेनास्य ततो विविक्तविषयत्वं तथा एकस्मिन्नाधारे अनेकमाधेयं यत्स द्वितीयः।
पर्यायः ननु अत्र समुच्चयालंकारो भवत्विति इत्येतदर्थं क्रमेणेति योज्यम् अत एव
गुणक्रियायौगपद्यं समुच्चय इति समुच्चयलक्षणे यौगपद्यग्रहणम् अत एव
क्रमाश्रयणात्पर्याय इत्यन्वर्थमभिधानम् विनिमयाद्भावाभ्यां परिवृत्तिरिति लक्षणं ५॰
तस्माद्धि विनिमयो लक्षणे विनिवर्त्यते तत्रानेकः संहतरूपः संहतरूपश्चेति द्वि

विधः तच्चद्वैविध्यमाधारध्येयगतमितिचत्वारोभेदाः क्रमेणयथा नभ्याश्रय।
स्थितिरियेनवकालकूटकेनोत्तरोत्तरविशिष्टपदोपदिष्टा प्रागर्णवस्यहृदयेवृ
षलक्ष्मणोथकरोदथुनावसम्भिवाश्चिष्टनःखलानाम् विस्तरागाद्धरान्निव
र्तितः स्तनंगतरागात्कृणिणामाश्रुकंमकात् कृशांशुरादानुपविष्टतोगुलिःकृताश्र
स्तत्रप्रणयीतयाकरः निशासुभास्वत्कलनपुरारांयःसंचरोभ्यस्इभिसारिका
णाम् नदन्मुखोल्काविचितामिषाभिः सबाह्यतेराजपथःशिवाभिः येत्रैवमु
न्येतिकृष्णेत्सरीतिप्रियेतिकांतेतिमहोत्सवोभूत् तत्रैववदैवाद्वदनेमदीयेपत्नी
तिभार्येतिगिरश्चरेति अत्रकालकूटमेकमनेकस्मिन्नसंहतेश्राश्रयेक्रमेणस्थि
तिमन्निवद्धम् करस्त्वेकोनेकस्मिन्संहतेक्रमवान् अपरकन्नकयोर्निहत्युपादान
तयासंहतत्वेनस्थितत्वात् अभिसारिकाःशिवाश्चैकनेकस्त्ववाश्चसंहतत्वपाएक
स्मिन्नाश्रयेराजपथेक्रमवर्तिन्यः वचनेचैकस्मिन्नाश्रयेमनुग्यात्वादिवर्गश्चवर्ग

त्वादेवसंहृतत्वरूपेणैकक्रमवात्मरूपनिबद्धः समन्यूनाधिकानांसमाधिकन्यूनैर्वि
निमयःपरिवृत्तिः विनिमयोऽत्रकिंचित्त्यक्त्वाकस्यचिदादानम् समेनतुल्यगुणेनत्य
श्र·ल· ज्यमानेनतादृशस्यैवादानम् तथा अधिकेनोत्कृष्टगुणेनदीयमानेनन्यूनस्य
स· हीनगुणस्यपरिग्रहः एवंन्यूनेनहीनगुणेनत्यज्यमानेनाधिकस्योत्कृष्टगुणस्य
५१ स्वीकारः तदेषात्रिप्रकारापरिवृत्तिः क्रमप्रतिभासंभवात्पर्यायानंतरमस्याल
क्षणम् समपरिवृत्तिर्यथा उरोदत्त्वामराणांयेनयुद्धेषुगृह्णताहिरण्यादवा
प्यायेषुयशःसाकंजयश्रिया अत्रोरोयशसोस्तुल्यगुणत्वम् अधिकपरिवृत्ति
र्यथाकिमित्यपास्याभरणानियौवनेधृतंत्वयावार्धकशोभिवल्कलम् वदप्र
दोषेस्फुटचंद्रतारकेविभावरीयद्यरुणायकल्पते अत्राभरणोत्कृष्टगुणोरो
न्यूनगुणस्यवल्कलस्यपरिवृत्तिः न्यूनपरिवृत्तिर्यथा तस्यहिप्रवयसोजटायु ५१
षःस्वर्गिणःकिमिवशोच्यतेऽधुनायेनजर्जरकलेवरव्ययात्क्रीतमिंदुकिर।

रोगाञ्चलेयशः अत्रकलेवेरोगान्नगुरोनयशसाउत्कृष्टगुणास्यविनिमयः इत्याद

शीनमेतेमन्याराणावरतनत्वयाक्रीताःकिंत्वपहृतास्तिमनोयद्दत्वावराणावराकमेतेन।

दस्तत् अत्राद्येर्थेसमपरिहृतिः द्वितीयेर्थेन्नपरिहृतिः एकस्यानेकत्रगामा

वेकत्रनियमनेपरिसंख्या एकानेकप्रस्तावादिहवचनम् एकंवस्तुयदानेक।

त्रयुगपत्संभाव्यतेनतदास्यासंभाव्यएकत्रद्वितीयपरिहारेणानियमनेपरिसंख्या

परिवर्जनेनकस्यचित्तुत्रचित्संख्यानेवर्णनीयत्वेनगणानेपरिसंख्या साचेषा

प्रश्नपूर्विकातदन्यथावेतिप्रथमंद्विविधा प्रत्येकंचवर्णनीयस्यगणाद्दत्वाघत्वा

भ्यांद्वैविध्यमितिचतुष्प्रभेदा क्रमेणायथा किंभूषणंसुदृढमत्रयशोनरत्नं।

किंकार्यमार्यचरितेसुकृतंनदोषः किंचक्षुरप्रतिहतंधिषणानतेज्ञानातिक

स्त्वदपरःसदसद्विवेकम् किमासेव्यंपुंसांसविधमनवद्यंद्युसरितःकिमेकांतेध्ये

यंचरणायुगलंकौस्तुभभृतःकिमाराध्यंपुण्यंकिमभिलषणीयंचकरुणाय।

दासत्वा चेतो निरवधि विमुक्तेः प्रभवति भक्तिर्भवेन विभवे व्यसने शास्त्रेन युवति

कामास्वेद्यं चिंतायशमिनवपुषि प्रायः परिहृष्यन्ते महताम् कौटिल्यं कचनिच

अ०ल० ये करचरणाधरदलेषु रागस्ते काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति।

स० अत्र च लौकिकं वस्तु गृह्यमाणं वस्त्वंतरव्यवच्छेदे पर्यवस्यतीति व्यवच्छेद्यं व

५२ स्त्वंतरं यत्र तु मा गृह्यते ति नियमाभावः अलौकिकाभिप्रायेणैव क्वचिदत्र एवं वि

57 वेकग्रहणं यथा विलक्षयेति श्रुति वक्त्रे यस्यां लीलावती नाम नयनोत्पलानि वि

भर्ति यत्रापि सर्वक्रिमाणामेको महाकालः अष्टार्थचंद्रः तथापि चित्रकर्मस्तुस्तवर्णा

संकेतोयति षुदंडग्रहणानीत्यादौ श्लेषसंस्कृतमस्यात्रत्यंतचारुनिबंधनम्

अत्र च नियमपरिसंख्ययोर्वाक्यविन्यासं लक्षणानादरणीयमिति व्याप्ता- ५२

नाय नियमनेपरिसंख्येति सामानाधिकरण्येनोक्तिः अत एव याज्ञिका अपि

प्राप्तिरत्र स्वीक्रियते इति युगपत्संभावनं प्राप्तिकम् इंडावृष्टिकायार्थांतराप

ततमथापत्तिः दंडापूपयोर्भावः दंडापूपिकाहेतुसनोच्चाभिभश्च तुल्यपूषोदशादि।
त्वाद्युद्भावः यथास्वहमहमिकेत्यादाविति केचित् अन्येन्तु दंडापूपयोर्विद्यते यस्यां।
नीतिमा दंडापूपिकानीतिः एवमहंशक्तो अहंशक्तो स्यामित्यहमहमिके तिमत्वर्थीया।
ष्टञ्चित्याहुः अपरेन्तु दंडापूपाविवदंडापूपेति इवप्रतिकृतावितिकनेवर्णयेति अ
त्रहि मूषककर्तृके दंडभक्षणेन तत्सहभाव्यपूपभक्षणमर्थात्सिद्धम् एषन्यायो
दंडापूपिकाशब्देनोच्यते अतस्तु यथा दंडभक्षणादपूपभक्षणमर्थादायातं तेन तुल्य
स्यचिदर्थस्य निष्पत्तौ सामर्थ्यात्समानन्यायत्वलक्षणाद्यदर्थान्तरमायततिसार्थाप
त्तिः नचेदमनुमाने समानन्यायस्य संबंधरूपत्वाभावात् असंबंधे चानुमानानुत्था
नात् अर्थापत्तिश्च वाक्यविदां न्यायप्रतितज्जातीयेन ह्याभिधानम् इयं च द्विविधा।
प्राकरणिकादप्राकरणिकस्यार्थादापतने एकः प्रकारः अप्राकरणिकात्प्राकरणि
कस्यार्थादापतने द्वितीयः प्रकारः आद्यो यथा पशुपतिरपितान्यहानि कृच्छ्रादगम

यदङ्गीकृततासमागमोऽर्कः कमपरमवश्यंनविपत्स्यतेविभ्रमर्पितेयदमीस्पृशंतिभावाः
अत्रप्रभृहेतोतःप्राकरणिकः रत्नरञ्जनहेतोतमप्राकरणिकमर्थादाक्षिपतिद्वितीये
अ·ल· यथा धृतयन्त्रिषिवाकृशाल्लिनिशेलानननमेनियतदाश्चर्यम् रिपुसंज्ञकेषुगणना।
स· कैववताकेषुकाकेषु अत्रैशैलहेतोतोप्राकारणिकोरिपुहेतोतेप्राकरणिकमर्था
५२ दाक्षिपति कश्चित्प्रायसामान्यतिमित्तेश्लेषेणनिर्दिश्यते अलंकारःशंकाफलत
53 रकपालेपरिज्ञनोविशीर्णाशोभंगीवत्तचहषप्वोगतवयाः अवस्थयेस्यारोगा
रपिभवतिसर्वास्वगुणेविपर्ययोवक्रेमर्थेस्थितवतिवयंकेपुनरमी अत्रविपर्ययोवक्रे
इतिश्लिष्टम् अप्राकरणिकाश्चस्याराहुतेनान्याकरणिकार्थापतनम् तत्पव
लविरोधोविकल्पःविरुद्धयोस्तुल्यप्रमाणाश्लिष्टत्वानुल्यबलयोरेकत्रयुगपन्प्रा
प्तौविरुद्धत्वादेवयोगपद्यासंभवेविकल्पःऔपम्यगर्भत्वाच्चात्रचारुत्वंयथा नम ५२
यंतुशिरांसिधनूंषिवाकर्णपूरीक्रियंतामाज्ञामौर्व्यांवेत्यादि अत्रप्रतिराजका

ध्येनमनेनेत्यादिरसोयन्तवीचनत्नुल्यप्रमाणग्राह्यत्वे संधिविग्रहादौ चात्र क्रमेणानु
ल्यप्रमाणेन प्रतिराजविषयत्वेन स्पर्धयाद्वयोरपि संभाव्यत्वात् द्वौ चेमौ विरु
द्धाविति नाह्यनयोर्युगपत्प्रवृत्तिः श्रामुखस्य युगपत् प्रकारान्तरस्याज्ञाना
शंक्यत्वादिति ननु तस्य न्यायप्राप्तो विकल्पः न मनवंकृते च नयोः साहचर्यमित्यले
कारना एवं कर्णपुरेच्छ्रियं तामित्यादौ योजनीयम् उपमागर्भत्वाच्च चावि
च्छेपावहं भेनाप्ययं दृश्यते यथा भक्ति प्रह्वविलोकनप्रणयिनी नीलोत्पल
स्पर्धिनी ध्यानालंबनतां समाधिनिरतैर्नीते हितप्राप्तये लावण्यस्य महा
निधी रसिकतां लक्ष्मीदृशोस्तन्वती युष्माकं कुरुतां भवार्तिहरणं नेत्रे तनु
र्वेहारेः अत्र नेत्रे तनुर्वेति विकल्पः उपमत्वाच्च तनुल्यप्रमाणग्राह्यत्वम् न
चात्र समस्यैवाशङ्कः संभवत्यामपि गते महाकविव्यवहारे तथा प्रयोगा
भावात् ननु विरोधनिमित्तको विकल्पः कथं चात्र विरोधः नैतत् तनुमा

ध्येनैतयोः प्रविष्टत्वात्तयोः पृथगभिधानमेव कार्यं कृतं च मत्स्पर्धिभावं गमय-
ति स्पर्धिभावाच्च विरुद्धत्वं नैतेऽप्यथवा समस्तमेव शरीरमित्यर्थावगमे विका-
अ·ल· ल्पस्य प्रत्यायत्वात् न चात्र श्लेषाश्लिष्टः लिंगश्लेषस्य वचनश्लेषस्य चात्र दृष्टेः
स· तस्मात्समुच्चयप्रतिपक्षभूतो विकल्पाख्योऽलंकारः पूर्वैरकृतविवेकोऽत्र द-
५४ र्शित इत्यवसातव्यम् गुणक्रियायौगपद्यं समुच्चयः गुणानां विमलत्वादीनां यौग-
54 पद्येनावस्थानं तथैव च क्रियाणां समुच्चयालंकारः विकल्पप्रातिपक्ष्येण
चास्य स्थितिः क्रमेणोदाहरणं विदलितसकलारिकुलं तव बलमिदमा
भूद्विमले च प्रबलमुखानि नराधिप मलिनानि च तानि जातानि अयमे-
कपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे नववारिधरोदयादहो- ५४
भिर्भवितव्यं च निरातपत्वरम्यैः एतद्भिन्नविषयत्वेनोदाहरणद्वयम् ए-
काधिकरणत्वेनाप्ययमलंकारो दृश्यते यथा विभाणां हृदये त्वया विनि-

हितेप्रेमाभिधानेनवंशल्यंयद्धिदयातिसाविधुरितामायोनदाकर्णपताम् शेतेशुष्य
तितांम्यतिप्रलपतिप्रम्लायतिवैरवतिभ्राम्यत्युल्लुठतिप्राणाश्चपतिदलत्युन्मूर्छतित्रु।
यति एवंगुणसमुच्चयेप्युदाहार्यम् केचित्तुननकेवलंगुणक्रिययोर्व्यस्तत्वेनस
मुच्चयोयावत्समस्तत्वेनापिवर्ण्यायमुदाहरंतिच यंचतंकेचितमुन्मुखंवहमितिकस्मा
हृतमाकेकरंव्याहृतंप्रसरन्मसादिमुकुलंसप्रेमकंप्रेखितम् उद्भ्रांतमपांगहृति
विकंचमज्जनंरोतेरंचवद्यसाश्चवर्तितैरसवशादेकैकमन्यक्रियम् अत्राकेकरा
दयोगुणशद्वांचदित्यादयःक्रियाशद्वाइतिसामान्येनगुणक्रिययोगपद्यंप्रमादि
तप्रेमेत्यादीनांसमासकृतमिहितेषुसंबंधाभिधानमितिसंबंधस्यवाच्यत्वात्तस्यचसिद्ध
धर्मरूपत्वेनगुणत्वात्क्रियाशद्वेनयोगपद्यंदृष्टव्यम् एवमयंत्रिविधःसमुच्चयः एवंस
मुच्चयंप्रकारत्रयभिन्नंलक्षयित्वाद्वितीयंलक्षयति एकस्यसिद्धिहेतुत्वेन्यस्तत्कर
त्वेच समुच्चयइत्येव यत्रैकःकस्यचित्कार्यस्यसिद्धिहेतुत्वेनप्रक्रांतस्तत्रान्योपियदि

स्पर्धया तत्सिद्धिं करोतीति तदायमपरः समुच्चयः नचायं समाधिलंकारेंतर्भवति यत्र ह्ये
कस्य कार्यं प्रति हेतोः साधकत्वमन्यस्तु तत्कारीयकाकतालीयेन पतति तत्र समाधिर्वक्ष्य
अ॰ल॰ ते यत्र तु खलेकपोतिकया बहूनामवतरस्तत्र समुच्चयः अतश्चानयोः सुमहान्भेदः
स॰ स एष समुच्चयः सद्योगे असद्योगे सदसद्योगे च भवतीति त्रिधाभिधीयते तत्र शोभन
५५ स्य सता समुच्चीयमानेन योगे यथा कुलममलिनं भद्रा मूर्तिर्मतिः श्रुतशालिनी भु
55 जबलमलं स्फीता लक्ष्मीः प्रभुत्वमखंडितम् प्रकृतिसुभगा ह्येते भावा अमीभिरयं
जनो भजति सुतरां दर्पं राजंस्त एव तवांकुशाः अत्रामालिन्येन शोभनस्य कुलस्य म
त्यादिभिः शोभनैः समुच्चयः एकैकं दर्पहेतुतायोग्यं परस्परस्पर्धया निबद्धम् असतो
शोभनस्यासता समुच्चीयमाणेन योगे यथा दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे म।
नोऽत्युत्सुकं गाढं प्रेम नवं वयोऽतिकठिनाः प्राणाः कुलं निर्मलम् स्त्रीत्वं धैर्यविरोधि मन्म ५५
थसुहृत्कालः कृतान्तोऽक्षमो नो सख्यश्चतुराः कथं नु विरहः सोढव्य इत्थं शठः अत्र।

स्मरमार्गणानां दुर्वारत्वेनाशोभनानां तादृशैरेव प्रियतममधुरत्वादिभिः समुच्चयः नववयः
प्रभृतीनां च यद्यपि स्वतः शोभनत्वं तथापि विरहविषयत्वेनाशोभनत्वं ज्ञेयं सदसतः
शोभनाशोभनस्य तादृशेन सदसता समुच्चीयमानेन योगे यथा शशी दिवसधूसरो गलि
तयौवना कामिनी सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः प्रभुर्धनपरायणः सतत
दुर्गतः सज्जनो नृपांगनगतः खलो मनसि सप्त शल्यानि मे अत्र शशिनः स्वतः शोभना
स्यापि दिवसधूसरत्वेनाशोभनेन सदसतः तादृशैरेव कामिनीप्रभृतिभिः समुच्चयः ।
नन्वत्र कथं समुच्चीयमानः शोभनोऽन्यस्य शोभन इति सदसद्योगो व्यारेवयः अत्र नृ
पांगनगतः खल इति शोभनः अन्येन शोभना इति कथं समुच्चीयमानस्य सतः तादृशे ।
नासता योगः नैतत् नृपांगनगतः खल इति प्रस्तुतप्रक्रमभेदाद्दुष्टमेव न तु सौंदर्य
निमित्तमित्युपेक्ष्यमेवैतत् अत एवास्मिन्नेवमादावेव सहचरभिन्नत्वाद्दुष्ट एवेत्युक्त
म् प्रकृते नृपांगनगतत्वेन शोभनत्वं खलत्वेनाशोभनत्वमिति समर्थनीयम् ।

एवमपि विशेष्यस्याशोभनत्वं प्रक्रान्ते विशेषणस्याशोभनत्वमिह त्वन्यथेति न सर्वथाऽनि
रवद्यमेतत् ननु द्वीपाः स्मरमार्गणा इत्यादावुक्तोदाहरणवत्कथं न सदसद्योगः ।
अ.लं. नैतत् इह शोभनस्याशोभनत्वमिति विवक्षितं न त्वशोभनत्वमेवेति तद्धि विवक्षि
स. तमित्यस्ति भेदोऽनयोः अत एवैकत्रोपसंहृतं मनसि सप्तशल्यानीति तदवरत्वेनान्तःप्र
५६ विष्टानामपि व्यवाहृतत्वात् अपरत्र तु न कथंसोढव्यमिति सर्वथादुष्टत्वाभिप्रायेणा
56 तस्मादस्ति प्रकारत्रयस्यापि विविक्तविषयत्वम् कारणान्तरयोगात्कार्यस्य करत्वे समा
धिः केनचिदारब्धस्य कार्यस्य कारणान्तरसंबंधात्सौकार्यं यत्तत्सम्यगाधानात्समाधिः
समन्वयसाहृप्यात्तन्निरंतरमपदेशः तद्वैलक्षण्यं पत्तप्राकृतियादितमेव तदा मा
नमस्या निराकर्तुं पादयोर्मे पतिष्यतः उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम् अत्र ५६
माननिराकरणकार्ये पादपतनं हेतुः तत्सौकर्यार्थं घनगर्जितं तस्य कारणान्तरस्य प्र
वेशः सौकर्यं चोपकारायेत्यनेन प्रकाशितम् एवं वाक्यन्यायाश्रयिणोऽलंकारान्निणा

याधुना लोकन्यायाश्रयिणोऽलंकारा उच्यन्ते तत्र प्रतिपक्षप्रतीकाराशक्तौ तदीयतिर
स्कारः प्रत्यनीकम् यत्र बलवतः प्रतिपक्षस्य दुर्बलेन प्रतिपक्षेण प्रतीकारः कर्तुं न
शक्यते शक्तिनन्तं बाधितुं दुर्बलस्य विद्यागेतं तिरस्कारः क्रियते तत्प्रत्यनीकम् अनीक
स्सैन्यस्य प्रतिनिधिः प्रत्यनीकम् यथानीकेऽभियोक्तव्ये तत्रासामर्थ्यात्तत्प्रतिनिधि
भूतमन्यद्यापोहेनाभियुज्यते तद्वदिह प्रतिपक्षे विजेये दुर्बलं तदीयतिरस्कारेणा
मिन्यर्थः प्रतिपक्षगतत्वेन बलवत्त्वख्यापने प्रयोजनम् यथा यस्य किंचिदपकर्तु
मक्षमः कायनिग्रहगृहीतविग्रहः कांतवक्त्रसदृशाकृतिं कृती राहुरिंदुमधुनापि बा
धते अत्र राहोर्भगवान्कृष्णो बलवान्प्रतिपक्षः तदीयवक्त्रसादृश्यसम्बन्धेन पुनर्बला
च्चंद्रमाः तत्तिरस्काराद्भगवतः प्रकर्षावगतिः उपमानस्याक्षेपः उपमेयताकल्पनं वा
प्रतीपम् उपमेयस्यैवोपमानाभारोद्वहनसामर्थ्यादुपमानस्य कैमर्थ्येनाक्षेपा
त्यालोचनं क्रियते तदेकं प्रतीपम् उपमानप्रतिकूलत्वादुपमेयस्य प्रतीपमिति व्यपदे

शः यदप्युपमानतया प्रसिद्धस्योपमानान्तरप्रतीतिस्तापयिष्यास्यानादरार्थमुपमेया-
त्वकल्पनं तन्निर्वैकगम्यान्द्वितीये प्रतीपम् क्रमेणोदा यत्र च प्रमदानां चन्द्रेवसद्ध-
जेनेन्दु मालामेऽनेभारः कुवलयदलदामानीत्यादि यथा लवणोपोकसिमप्रतापगरि
अ॰ लं॰ स॰ ५८ 58 मराष्प्रैसेरत्यागिनोदेवत्वयिवनीभरद्वासभुञ्जेनित्यादिनेवेदसा ईदृशं किंयदितनकि
मेषविहितः यथा किमित्यादिनें चिनारत्नमहोमत्ये पेवकिममीहृष्टाः कुलह्माभृतः
अत्र यथासंरत्नमप्यलीतिग्रावत्वतिपादितम् यथाहि यावत्संदरिकस्तुं दन्तकुगास्या
स्तवर्णाज्ञे नजमन्हे गाकिमाम्यरिचंदोऽउबमिज्ञश्जरोगा अत्रोपमानत्वेन प्रसि-
द्धस्य चंद्रमसो निकर्षार्थमुपमेयत्वकल्पितं चदनस्य चोपमानविवक्षात्र प्रयोजि
का द्वितीयं तन्निष्पन्नमेवौपम्यमनादरकारणं यथा गर्वमसंवाह्यमिमं लोचनयुग
लेन किं वहसि मुग्धे संतीदृशानि दिशि दिशि सरःसु ननु नीलनलिनानि अत्रोत्क ५८
र्षभाजि उपमानप्रादुर्भावएवन्यक्कारणम् अनेन न्यायेनात्मनुत्कृष्टगुणत्वाद्धस्य

मानभावमपि न सहते तेन सोपमानत्वकल्पनोपि प्रतीयमेव यथा अहमेव गुरुः सुदा
रुणानामिति हालाहल तात मास्म दृप्यः ननु संति भवादृशानि भूयो भुवनेस्मिन्वचनानि
दुर्जनानाम् अत्र हालाहलत्वं प्रकृष्टदोषत्वात्संभाव्योपमानमप्युपमानत्वेन न निबद्धम् ।
वस्तुना वस्त्वंतरनिगूहनं मीलितम् सहजेनागंतुकेन लक्ष्मणा यद्वस्तु तेनेतरावस्त्वंतरं
निगूह्यते तदन्वर्थाभिधानं मीलितम् न चायं सामान्यालंकारः तस्य हि साधारणगुणयो
गाद्भेदानुपलक्षणरूपम् अस्य तूत्कृष्टगुणेन निकृष्टगुणस्य तिरोधानमिति महाननयो
र्विशेषः सहजेन यथा अपांगतरले दृशौ मधुरवक्रवर्णा गिरो विलासभरमंथरा गतिरती
व कांतं मुखम् इति स्फुरितमंगके मृगदृशां स्वतो लीलया तदत्र न मदोदयः कृतपदोपि संल
क्ष्यते अत्र तरलत्वादिना स्वाभाविकेन लक्ष्मणा मदोदयकृतं तरलत्वादि तिरोधीयते आ
गंतुकेन यथा ये कंदरासु निवसंति सदा हिमाद्रेस्त्वत्पातशंकितधियो विवशा द्विषस्ते अप्यं
गमुत्पुलकमुद्वहतां सकंपं तेषामहो बत भियां न बुधोप्यभिज्ञः अत्र हिमाद्रिकंदरानिवास

सामर्थ्यप्रतिपन्नेनतेनैवसमसम्भावितावागन्तुकौकंपरोमांचौभयहृतयोस्तिरोधायकौतिरो
धायकत्वादेवचमीलितव्यपदेशः प्रस्तुतस्यान्येनगुणसाम्यादैकात्म्यंसामान्यम् यत्रप्र
स्तुतस्यवस्तुनः अप्रस्तुतेनसाधारणगुणयोगादैकात्म्यभेदानध्यवसायादेकरूपत्वंनिबध्य
तेतत्समानत्वयोगात्सामान्यम् नचेयमपह्नुतिः किंचिन्निषिध्यकस्यचिदप्रतिष्ठापनात्
उदाहरणम् मलयजरसविलिप्ततनवोनवहारलताविभूषिताः सिततरदंतपत्रकृता
वतंसरुचयोरुचिरामलांशुकाः शशभृतिविततधाम्निधवलयतिधरामविभाव्यतांगा
ताः प्रियतमवसतिंप्रयान्तिसुखमेवनिरस्तभियोभिसारिकाः अत्रमलयजरसवि
लेपनादीनांचंद्रप्रभयासहाविभाव्यतांगताइतिभेदाप्रतीतिर्दर्शिता स्वगुणत्यागादत्यु
त्कृष्टगुणस्वीकारस्तद्गुणः यत्रपरिमितगुणंवस्तुसमीपवर्तिप्रकृष्टवस्तुगुणस्वीकरणं
करोतिसतद्गुणः तस्योत्कृष्टगुणस्यगुणाअस्मिन्नितिकृत्वानचेदंमीलितम् तत्रहिप्रकृ ५८
तवस्तुवस्त्वन्तरेणाच्छादितत्वेनप्रतीयते इहत्वनपह्नुतस्वरूपमेवप्रकृतवस्तुवस्त्वन्तर

गुणेनापरकृततयाप्रतीयतेइत्यनयोर्भेदः उदा० विभिन्नवर्णागरुडाग्रजेनसूर्यस्यरथ्याःप
रितःस्फुरन्त्याः रत्नैःपुनर्यत्ररुचारुचंस्वामानिन्यिरेवंशकरीरनीलैः अत्ररविरथ्याना
मरुणवर्णस्वीकारःतस्यापिगारुत्मतमणिप्रभास्वीकारइतितद्गुणत्वम् सतिहेतौत
द्रूपाननुहारोतद्गुणः तद्गुणप्रस्तावात्तद्विपर्ययरूपोतद्गुणउच्यते इहन्यूनगुणस्यो
त्कृष्टगुणपदार्थधर्मस्वीकारःप्रत्यायत्यान्यायःयदापुनर्न्यूनस्योत्कृष्टगुणसन्निधानादेवहे
तोःसत्यपितद्रूपस्योत्कृष्टगुणस्याननुहरणंन्यूनगुणेनानुवर्तनंभवतिसअतद्गुणः न
स्योत्कृष्टगुणस्यास्मिन्गुणानसन्तीतिकृत्वा यदिवा तस्याप्रकृतस्यरूपाननुहारःसत्यनु।
हरणहेतावतद्गुणःतस्याप्रकृतस्यगुणाअस्मिन्नसन्तीति क्रमेणोदा० धवलोसिजइविसुं
दरतहवितएमज्झरंजिअंहिअअं राअभरिएविहिअएसुहअणिहित्तोणरत्तोसि गांगमं।
बुसितमेवयामुनंकज्जलाभमुभयत्रमज्जतः राजहंसतववैसैवशुभ्रताचीयतेनचनचाप
चीयते अत्रातिरिक्तहृदयसंपर्कोन्नायकस्यधवलशब्दवाच्यस्यरागमयस्यापिरक्तत्वेननिष्प

अ॰ल॰
स॰
५९
59

न्नमित्यनङ्कुराः उत्तरत्राग्रहणतस्मार्गगयामुनजलस्पर्शसंपर्केऽपि ततथाऽस्यत्वमित्ययमप्य
नङ्कुराणेवकार्यकारणाभावस्य चात्राविवक्षणान्नविषमालंकारावकाशः उत्तरात्प्रश्नो
न्नयनं मसकृदसंभाव्यमनुत्तरं चोत्तरम् यत्रानुपबध्यमानोऽपि प्रश्न उपनिबद्धः उत्तरात्तु
न्नीयते तदेकमनुत्तरम् नत्वनसकृत् तावन्मात्रेणाचारुत्वाप्रतीतेः अतश्चासकृदुपनि
बद्धे द्वितीयमनुत्तरम् नचैषपरिसंख्यात्वव्यवच्छेद्यव्यवच्छेदकपरत्वाभावात् क्रमेणोदा
हा एकाकिनी यदबला तरुणी तथाहमस्मद्गृहे गृहपतिश्च गतो विदेशम् कंयाच
से तदिह वासमियं वराकी श्वश्रूर्ममान्धबधिरा ननु मूढ पान्थ काविसमादेवगरे किलहं
जेजरिणागुणग्गाही किसुन्नो सकलतेविंदुग्रेजेरवलोलोओ पूर्ववन्ममनिवासोऽदीय
तामिति प्रश्न उत्तराद्वन्नीयते उत्तरत्वं तद्दैवगत्यादिनिगूढत्वादसंभाव्यमसकृत्प्रश्नपूर्व
कमनुत्तरं निबद्धम् इतःप्रभृति गूढार्थप्रतीतिपरालंकारलक्षणाम् संलक्षितसूक्ष्मा
र्थप्रकाशनं सूक्ष्मम् इहसूक्ष्मः स्थूलमतिभिरसंलक्ष्यो योऽर्थः स यत्राकारेणाग्रीयत इति ५९

मिरिंगिताकाराभ्यां संलक्ष्यते तदा संलक्षितस्य विदग्धं प्रति प्रकाशनं सूक्ष्मम् । तत्रेंगि-
ताद्यथा संकेतकालमनसं विटं ज्ञात्वा विदग्धया । हसन्नेत्रार्पिताकूतं लीलापद्मं नि-
मीलितम् । अत्र संकेतकालाभिप्रायः विटसंबंधिना भ्रूक्षेपादिनेंगितेन लक्षितो रा-
जनिकालभाविना लीलापद्मनिमीलनेन प्रकाशितः । आकाराद्यथा वक्त्रस्यंदिस्वेद-
बिंदुप्रबंधैर्दृष्ट्वा भिन्नं कुंकुमं कापि कंठे । पुंस्त्वं तन्व्या व्यंजयंतीवयस्या स्मित्वा पाणौ ख-
ड्गलेखां लिलेख । अत्र स्वेदकृतं कुंकुमभेदरूपेणाकारेण संलक्षितं पुरुषायितं तस्याः
पुरुषोचितेन खड्गलेखनेन प्रकाशितम् । उद्भिन्नवस्तुनिगूहनं व्याजोक्तिः । यत्र निगू-
ढं वस्तु कुतश्चिन्निमित्तादुद्भिन्नं प्रकटतां प्राप्तं सत् स्वेतरप्रदेशे प्रशान्तिगूह्यते अपलप्य-
ते सा वस्तुस्वेतरप्रदेशेपन्नपस्य व्याजस्य वचनाद्व्याजोक्तिः । यथा शैलेंद्रप्रतिपाद्यमानगि-
रिजाहस्तोपगूढोल्लसद्रोमांचादिविसंस्थुलाखिलविधिव्यासंगभंगाकुलः । हा शैत्यं
तुहिनाचलस्य करयोरित्यूचिवान्सस्मितं शैलांतःपुरमातृमंडलगणैर्दृष्टोऽवताद्वः शिवः ।

अत्र रोमांचादिनोद्भिन्नो रतिभावः शैत्यग्रहेणैव रागापलपितः यद्यप्यपह्नुतावपि प्रस्मिन्नत्वख्या
पनेन पुनरपह्नुतत्वेन प्रकाशितः तथाप्यपलापमात्रं चित्तयास्यालंकारस्योल्लेखः न
अ.ल. त्वत्रापह्नुतिग्रंथे यथा सदृशः ययोापह्नवः सापह्नुतिः तथात्रापह्नवायापि यत्सादृश्यं सा
स. प्यपह्नुतिरिति स्थापितम् व्याजोक्तौ चान्यः प्रकारो विद्यते तत्कथमियमलंकारत्वेन
६. कथ्यते सत्यं उद्भटसिद्धान्ताश्रयेणानन्वेषितम् नह्नित्थमनेन व्याजोक्त्यपारख्यमलंकरणा
60
मस्ति इह तु तत्स्य सद्भावान्नाप्तिरिक्तापह्नुतिरिति पृथगयमलंकारो निर्दिष्टः अन्य
योक्तस्य वाक्यस्य काकुश्लेषाभ्यामन्यथा योजनं वक्रोक्तिः उक्तिव्यपदेशसाम्याद्व्याजो-
क्त्यनंतरं वचनम् यद्वाक्यं केनचिदन्यथान्याभिप्रायेणोक्तं सदपरेणावक्रा काकु
प्रयोगेन श्लेषमुखेन वान्यथान्यार्थं घटनया योज्यते तदुक्तिवक्रोक्तिः काकुप्रयो ६.
गेन यथा गुरुपरतंत्रतया वत दूरतरं देशमुद्यतो गंतुम् अलिकुलकोकिललतिते नै
ष्यति सखि सुरभिसमयेसौ एतद्वाक्यं नायिकानिषेधपरत्वेनोक्तं नन्वख्या काकुप्रयो

गेरा विधिपर्यन्तं प्रापितम् काकुवशाद्विधिनिषेधयोर्विपरीतार्थसंक्रान्तिश्लेषो भंग
संगत्वेनोभयमयत्वेन त्रिविधः तत्राभंगश्लेषमुखेन यथा अहो केनेदृशी बुद्धिर्दारुणा
तव निर्मिता त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित् अत्र दारुणेति प्रथमार्थेन प्रक्रा
न्तश्लेषभंग्यान्तरीयार्थं तया संपादितम् सभंगश्लेषमुखेन यथा त्वं हालाहलभृत्क
रोषि मनसो मूर्छां समालिंगितो हालां नैव विभर्मि नैव च हलं मुग्धे कथं हालिकः सत्यं।
हालिकतैव ते समुचिता सक्तस्य गोवाहने वक्रोक्त्येति जितो हिमाद्रिसुतया स्मेरो हरः पा
तु वः उभयमुखेन यथा विजये कुशलस्त्र्यक्षो न क्रीडितुमहमनेन सह शक्ता विजया।
कुशलोस्मि न तत्र्यक्षो द्वावष्टद्वयमिदं पारौ किं मे दुरोदरे गां प्रयातु गणाधिपतिर्यदि न तेऽभिम
तं करहहे द्वेष्टि विनायकमहिलोकः किं न जानासि चेद्ग्रहरोऽन्न विमानाहिस्मरमे किं प्रता
रयस्येवम् देव्यो यदि रुचितमिदं नंदिनाहूयतां राकुः हार्वह्रीशिततदेष्टुभयकृतिनिक
टस्येतरतिः कस्य यदि नेच्छसि तन्मनः संप्रत्येवैष हारातिः वसुरहितेन क्रीडा भवता

सहकीदृशेनजिह्वेषिकिंवसुभिर्नमतोमन्तरामुरानेवयशस्पुरस्थारोपययस्मिन्नुयाकिंना
हंमभिज्ञाकिलत्वदंकस्यादिव्यंवर्षसहस्रंसंस्थितेविततिनयुक्तमभिधानम् इतिहनयप्रयु
तिपेशलयासकलीलाप्रयुक्तवक्रोक्तिः हर्षवर्धननरत्नतारकमाननमभ्याद्धवान्यावः
य॰ ल॰ वक्रोक्तिशब्दश्चालंकारसामान्यवचनोपिशब्दालंकारविशेषसंज्ञितः सूक्ष्मवस्तुस्वा
स॰ भावयथावद्वर्णनंस्वभावोक्तिः इहवस्तुस्वभाववर्णनमात्रेनालंकारः तत्वेसर्वंकाव्य
६१ मलंकारःस्यात् नहितत्काव्यमस्ति यत्रवस्तुस्वभाववर्णनेननविद्यतेतदर्थंसूक्ष्मग्रह
61
णम् सूक्ष्मःकविमात्रस्यगम्योतत्एवतन्निर्मितएवयोवस्तुस्वभावःतस्ययथावदन्
नानतिरिक्तत्वेनवर्णनेस्वभावोक्तिः उक्तिवाचोयुक्तिप्रस्तावादिहलक्षणाम् भाविकर
सवदलंकाराभ्यासस्यभेदोभाविकप्रसंगेननिर्णेष्यते उदा क्रेकारोनखकोटिचंचु
पुटकव्याघट्टनोद्दंकितस्तन्व्याःकंतलैकोतकव्यतिकरेसीत्कारसीमंतितः दृष्टा ६१
श्लिष्टदेवासनतलनभरोतेषांकपालीस्तथासैकाकेकरलोचनस्यकृतिनःकर्णावते

सोभवत् अतीतानागतयोः प्रत्यक्षायमानत्वं भाविकम् अतीतानागतयोर्भूतभाविनो
रर्थयोरलौकिकत्वेनात्यद्भुतत्वाद्याप्तसंबंधरहितशब्दसमर्पितत्वाच्च प्रत्यक्षायमानत्वं
भाविकम् कविगतोभावः आशयः श्रोतरि प्रतिबिंबत्वेनास्तीति भावोवाभावनापुनःपु
नश्चेतसि विनिवेशनं सोऽत्रास्तीति नचेयं भ्रान्तिः भूतभाविनो भूतभाविनयैव प्रकाशना
त् नापि रामोभूदितिवद्वस्तुवृत्तमात्रं भूतभाविगतस्य प्रत्यक्षत्वारोपस्य स्फुटस्यार्थिक
स्य प्रतिलंभात् नापीयमतिशयोक्तिः अन्यस्यान्यतयाध्यवसायाभावात् नहि भूतभा
अभूतभावित्वेनाध्यवसीयते अभूतभाविनाभूतभावित्वेन नापि प्रत्यक्षमप्रत्यक्षत्वेन
अप्रत्यक्षंवाप्रत्यक्षत्वेन नहि प्रत्यक्षत्वं केवलवस्तुधर्मः प्रतिपत्तापेक्षयैव वस्तुनि तथा
भावात् यदाहुः तद्वयोज्ञानप्रतिभासनात्मनोऽन्वयव्यतिरेकावनुकारयति सप्रत्यक्षर
ति तिकेवलं वस्तुप्रतीपत्त्वेप्रतिपत्तुः सामग्र्युपयुज्यते सा च लोकयात्रायां चक्षुरादीन्द्रि
यस्वभावा योगिनामतीन्द्रियार्थदर्शने भावनारूपा काव्यार्थविदां च भावनास्वभावैव सा

दभावनावस्तुगतात्यद्भुतत्वप्रयुक्ता अत्यद्भुतानां वस्तूनामादरप्रत्ययेन हृदि संधार्य
माणत्वात् नापि भूतभाविनामप्रत्यक्षाणां प्रत्यक्षतयैव प्रतीतेरिवार्थगर्भीकारेणायं
अ·ल· प्रतीयमानोऽस्त्विहा तस्याभिधानरूपाध्यवसायस्वभावत्वात् नह्यप्रत्यक्षत्वं प्रत्यक्ष
स· त्वेनाध्यवसीयते किं तर्हि काव्यार्थविद्भिः प्रत्यक्षत्वं प्रत्यक्षत्वेनाध्यवसीयते किं तर्हि का
६२ व्यार्थविद्भिः प्रत्यक्षत्वं रूप्यत इति नापि वस्तुगत इवार्थ उत्प्रेक्षाप्रयोजकः तस्याभिमान
62 रूपायाः प्रतिपत्तृधर्मत्वात् यदाहु अभिमानो व्यवसायो हि ज्ञानधर्मस्सुखादिवत् इति का
व्यविषयत्वे च प्रयोक्तापि प्रतिपत्तैव नात्यद्भुतपदार्थदर्शनादतीतानागतप्रत्यक्षत्वप्रती
तेः काव्यलिङ्गमिदम् लिङ्गलिङ्गिभावेन प्रतीत्यभावात् योगिवत्प्रत्यक्षतया प्रतीतेः ना
प्ययं पुरः प्रस्फुरद्रूपतया सचमत्कारं प्रतीतेः रसवदलंकार इत्यादिचित्तवृत्तीनां तदनुब
द्धतया विभावादीनामपि सायारोपन हृदयसंवादितया परमाद्वैतज्ञानिवत्प्रतीतेरना ६२
स्वभावात् इह च नाटकस्यानभूतभाविनां स्फुटतया भिन्नसर्वज्ञवत्प्रतीतेः स्फुटप्रतिप

नरकालेनसाधारणप्रतीतौस्फुटप्रतीतिनिमित्तकौतौनरकालिकौरसवदलंकारः
स्यात् नापीयंसहृदयवस्तुस्वभाववर्णनात्स्वभावोक्तिः तस्यालौकिकवस्तुगतस्वरूपमय
मेववर्णसाधारणेपनहृदयसंवादसंभवात् इहचलोकोत्तरारागोवस्तूनांस्फुटत्वयानाट
स्यैनप्रतीतेः क्वचित्लौकिकानामपिवस्तूनांस्फुटत्वेनप्रतीतौभाविकस्वभावोक्त्योः
समावेशःस्यात् नचहृदयसंवादमात्रेणस्वभावोक्तिरसवदलंकारयोरभेदःवस्तुसं
वादरूपत्वात्स्वभावोक्तेः चित्तवृत्तिसंवादरूपत्वाच्चरसवदलंकारस्यउभयसंवादसंभ
वेनसमावेशोऽपिघटतेयत्रवस्तुगतस्वरूपमेववर्णनास्यात् अन्यत्रतुरसवदलंकार
एवनाप्ययंशब्दानाकुलत्वहेतुकाव्यगुणार्थसमर्पणात्प्रसादाख्योगुणः तस्यस्फु
टास्फुटोभयरूपवाच्यार्थगतत्वेनप्रतीतौस्वरूपप्रतिलंभः तस्मादयंसर्वेषामेवाले
कारःतस्येचायंप्रचुरप्रयोगेदृश्यते यथा मुनिर्जयतियोगीन्द्रोमहात्माकुम्भसंभवः
येनैकचुलकेदृष्टौदिव्यौतौमत्स्यकच्छपौ यथावा हर्षचरितप्रारंभेब्रह्मसदसिवेद

स्वरूपवर्णनेनतत्रहिप्रत्यक्षमिवस्फुरदत्वेनतदीयंस्वरूपंदृश्यते एवंतत्रैवकुसुमनिवर्णन
पुष्पितदवर्णनादौज्ञेयम् अयंतत्रविचारलेशः संभवति इहकेचिद्वर्णनीयस्यवर्णना
अ.ल. वशादेवप्रत्यक्षायमानत्वम् केचित्प्रत्यक्षायमाणस्यैववर्णनम् आद्येयथादाहृतंप्रा
स. क्द्वितीयेयथा अनातपत्रोप्ययमत्रलक्ष्यतेसितातपत्रैरिवसर्वतोवृतः अचामरोप्ये
६२ षसतीववेज्यतेविलासवालव्यजनेनकोप्ययम् इत्यत्रप्रथमप्रकारविषयोयमलं-
63 कारः प्रकारांतरगोचरकविसमर्पितानांधर्मीणामलंकारत्वात् नहिमाधुर्यलावण्या
दीनामिववस्तुसन्निवेशिनाम् अपिच शाङ्गानाकुलताचेतितस्यहेमन्त्यचक्ष्यतेइति
भामहीये वाचामनाकुलत्वेनभाविकमितिचोद्भटेलक्षणेव्यस्तसंबंधरहितशब्दसम
र्पितत्वंप्रत्यक्षायमाणत्वप्रतिपादकेकथंप्रयोजकीभवेत् यदिवस्तुसन्निवेशधर्मि
गतत्वेनापिभाविकंस्यात्तस्माद्वास्तवमेवमहत्त्वमन्तरप्रकारविषयंवर्णितमितिनाय ६२
मयालंकारः यदिनवास्तवमपिसौंदर्यंकविनिबद्धंवासकलवस्तुगोचरीभूतंस्व

भावोक्तिवदलंकारतया वर्ण्यते तदायमपि प्रकारो नातीव दुःश्लिष्टः अत एव प्रत्यक्षा
इव यत्रार्था दृश्यन्ते भूतभाविनः तद्भाविकमित्येतावदेवास्य भाविकलक्षणमकारि स्वभा
वोक्त्या किंचित्सादृश्यात्तदनन्तरमस्य लक्षणं कृतम् समृद्धिमद्वस्तुवर्णनमुदात्तम्
स्वभावोक्तौ भाविके च यथास्थितवस्तुवर्णनं तद्विपर्यये त्वसमारोपितवस्तुवर्णनात्मन उ
दात्तस्यावसरः तत्रासंभाव्यमानविभूतियुक्तस्य वस्तुनो वर्णनं कविप्रतिभोत्थापितमैश्व
र्यलक्षितमुदात्तम् उदा मुक्ताकेलिविसूत्रहारगलिताः संमार्जनीभिर्हृताः प्रातः प्रा
ङ्गणसीम्नि मन्थरचलद्बालाङ्घ्रिलाक्षारुणाः दूराद्दाडिमबीजशङ्कितधियः कर्षन्ति केली
शुका यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्यागलीलायितम् अङ्गभूतमहापुरुषचरितं च उदा
त्तम् शब्दसाम्यादिहाभिधानं महापुरुषाणामुदारचरितानामङ्गीभूतवस्तुतः अङ्गभावेनो
पनिबध्यमानं चरितं चोदात्तम् महापुरुषचरितस्योदात्तरूपत्वम् उदा तदिदमरण्यं य
स्मिन्दशरथवचनानुपालनव्यसनी निवसन्बाहुसहायश्चकार रक्षःक्षयं रामः अत्रारोप

अ॰ लं॰ स॰ ६४ 64

वर्णनीयरामचरितमंगत्वेनवर्णितम् रसाभावतदाभासतत्प्रशमानांनिबंधेरसवत्प्रेय-
ऊर्जस्विसमाहितानि उदात्तेमहापुरुषचरितस्यचित्तवृत्तिरूपत्वाच्चित्तवृत्तिविशेषस्वभा-
वत्वाच्चरसादीनांमिहतदलंकारताप्रस्तावः अतएवचत्वारोलंकारायुगपल्लक्षिताः
तत्रविभावानुभावव्यभिचारिभिःप्रकाशितोरत्यादिश्चित्तवृत्तिविशेषोरसः भावोवि-
भावानुभावाभ्यांसूचितोनिर्वेदादिस्त्रयस्त्रिंशद्भेदः देवतादिविषयश्चरत्यादिः तदा-
भासोरसाभासोभावाभासश्च आभासत्वमविषयप्रवृत्त्यानौचित्यम् तत्प्रशमउक्त-
प्रकारालंकाराः भावस्यचात्रस्थितिरूपतयावर्णनेशांत्युदयावस्थत्ववर्णने ऊर्जस्विया-
था इत्याकर्षरागमोहमेवत्रइवमेतेनान्नयातेश्रुतिंचेतः कालकलामपिप्रकृहतेनावस्था-
तिंतांविना पतैवाकुलितस्यविहृतत्वतरंगैरनंगाकुलैः संपद्येतकदातदासिखरवमित्य- ६४
नन्वेवदिस्फुटम् अत्ररावणस्याभिलाषविप्रलंभशृंगारउक्तःकंचव्यभिचारिभावो-
नानौचित्येनप्रवृत्तो समाहितंयथा अक्ष्णोः स्फुटाश्रुकलुषोरुणिमानिलीनःशांतं

चमत्कार्थमपरस्यकारणान्युक्त्वा भावांतरस्यानवच्छिन्नगतोपिविशेषेणोद्भाटवासनतयाप्रस
रेददाति अत्रकोपस्यप्रशमः एवमन्यत्राप्युदाहार्यम् भावोदयसंधिशवलतास्तुपृथ
गलंकाराः भावस्याकत्रुत्पत्तेरुदय उद्भूतभावस्यासंधिः द्वयोर्विरुद्धयोः स्पर्धेभावेनोप
निबंधः शवलताबहूनांपूर्वपूर्वोपमर्देनोपनिबंधः एतेचपृथग्रसवदादिभ्योभिन्नत्वा
नालंकाराः एतत्प्रतिपादनेचोद्भटादिभिरेषांपृथगलंकारत्वेनानिर्दिष्टत्वात् अथ
चसंसृष्टिसंकरवैलक्षण्येनैतेसर्वालंकाराः पृथक्केवलत्वेनालंकाराइतिसर्वालंका
रविशेषत्वेनोक्तेसंसृष्टिसंकरयोर्हिसंकलनतयालंकाराणांस्थितिः तदेवलक्षणप्रतिपाद
नेमेतत् तत्रभावोदयोयथा एकस्मिन्शयनेविपक्षरमणीनामग्रहेमुग्धयासद्यःकोप
परांमुखंग्लपितयाचाटूनिकुर्वन्नपि आवेगादवधीरितःप्रियतमस्तूष्णींस्थितस्तत्क्ष
णान्माभूत्समरइत्यमंदवलितग्रीवंपुनर्वीक्षितः अत्रौत्सुक्योदयः भावसंधिर्यथा
वामेननारीनयनाश्रुधाराकृपाणधारामपदक्षिणेन उत्पुंसयन्नेकतरःकरेणकर्तव्य

मूढः सभ्रमेदो बभूव अत्र स्नेहाख्यरतिभावरौत्सुक्ययोः संधिः भावशबलता यथा क्वाका
र्यं शशलक्ष्मणः क्व च कुलं भूयोपि दृश्येत सा दोषाणां प्रशमाय मे श्रुतमहो कोपेपि कान्तं मु
अ॰ल॰ खम् किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेपि सा दुर्लभा चेतः स्वास्थ्यमुपेहि कः खलु यु
स॰ वा धन्योधरं पास्यति अत्र वितर्कौत्सुक्यमतिस्मरणशंकादैन्यधृतिचिन्तानां शबलता ।
६५ 65 तदेते चित्तवृत्तिगतत्वेनालंकारा लक्षिताः अधुनैतेषां सर्वेषामलंकाराणां संश्लेषस्तम्
स्थापितमलंकारद्वयमुच्यते तत्र संश्लेषः संयोगन्यायेन समवायन्यायेन चेति द्विधम
संयोगन्यायो यत्र भेदस्योत्कटतया स्थितिः समवायन्यायो यत्र तस्यैवानुत्कटत्वेन वर्तते
तत्रोत्कटत्वेन स्थितौ तिलतण्डुलन्यायः अनुत्कटत्वे क्षीरनीरसादृश्ये क्रमेण तदुच्यते एषां
तिलतण्डुलन्यायेन मिश्रत्वे संसृष्टिः उक्तालंकाराणां यथासंभवं यदि क्वचिद्गुणपक्षट
नास्यान्तरा किं पृथक्त्व एव पर्यवसितानां तत्तदलंकारान्तरमेव किंचिदिति विचार्यते तत्र ६५
यथा बाह्यालंकाराणां सौवर्णमणिमयप्रभृतीनां पृथक्चारुत्वहेतुत्वेपि संघटनकृतं

चारुत्वातिरेकं जायते न तु न्यक्कृतालंकाराणामपि संयोजने चारुत्वातिरेकमुपलभ्यते ते
नालंकारांतरप्रादुर्भावेन पृथक्त्वपर्यवसानमिति निर्णयः अलंकारांतरत्वे च सं
योगन्यायेन स्फुटावगमो भेदः समवायन्यायेन वा अस्फुटावगम इति द्वैतम् सर्वत्र
संसृष्टिः उत्तरत्र तु संकरः अत एव तिलतंडुलन्यायः क्षीरनीरन्यायश्च तयोर्यथार्थता
मवगमयतः तत्र तिलतंडुलन्यायेन भवंती संसृष्टिस्त्रिविधा शब्दालंकारगतत्वेना
र्थालंकारगतत्वेनोभयगतत्वेन च संकरस्तु प्रभेदचतुष्को वक्ष्यते तत्र शब्दालंकारसं
सृष्टिर्यथा ऊरुस्तंभे सौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया चलितया विदधे
कलमेखलाकलकलोऽलकलोलदृशान्यया अत्रानुप्रासयमकयोर्विजातीययोः
संसृष्टिः अत्रैव कलोलकलो इति तथा कलोलकलोले इति सजातीययोः यमकयोः सं
सृष्टिः अर्थालंकारसंसृष्टिर्यथा देवि त्वया गलति चन्द्रमसं दतारमुन्मीलयाम्बुनलि
नीवसंभ्रमगमन्नम् एष मदाननरुचेव विलुंठमानः पर्यायवैरं त्यजतीति स्मृतिभःशा

शोकः अत्रसजातीययोरुपमयोःसंसृष्टिः लिंपतीवतमोगानिवर्षतीवांजनंनभः अस
त्पुरुषसेवेवदृष्टिर्निष्फलतांगता अत्रोपमोत्प्रेक्षयोर्विजातीययोःसंसृष्टिः उभयसं
अ.ल. सृष्टिर्यथा आनंदसुंदरपुरंदरमुक्तमाल्यमौलौ हठेननिहितेमहिषासुरस्य पादां
स. बुजेभवतुमेविजयायमंजुमंजीरशिंजितमनोहरमंबिकायाः अत्रोपमानुप्रासा
६६ योःसंसृष्टिः पादांबुजमित्यत्रहि उपमायांमंजीरशिंजितयोरव्यवस्थायकंप्रमाणा
66
मू महिषरूपेकप्रतिकूलःपादविशेषाद्युपमाप्रमाधयति तदेवंत्रिधासंसृष्टिर्निरूपी
ता अधुनाक्षीरनीरन्यायाश्रयेणसंकरलक्षणमुच्यते क्षीरनीरन्यायेनतुसंकरः।
मिश्रत्वरूपेणव अनुत्कटभेदमनुत्कटभेदंचमिश्रत्वमंगांगिभावेनसंशयेनएकवाच
कानुप्रवेशेनचत्रिधाभवत्संकरंत्रिभेदमनुत्पादयति क्रमेणयथा अंगुलीभिरिव।
केशसंचयंसन्निगृह्यतिमिरंमरीचिभिः कुड्मलीकृतसरोजलोचनंचुंबतीवरज ६६
नीमुखंशशी अत्रांगुलीभिरिवेत्युपमा सैवसरोजलोचनमित्युपमायाःप्रसाधि।

का रजनीमुखमिति श्लेषमूलातिशयोक्तिः प्रारंभवदनाख्ययोर्मुखयोरभेदाध्यवसायात्।
अत एव तयोरंगांगिभावः एवं च वाक्यैकसमासोक्ते उपमे श्लेषानुगृहीता चातिशयोक्तिरु-
त्प्रेक्षायाश्चुंबतीवेति प्रकाशितायाश्चानुग्राहिका तद्बलेन तस्याः समुत्थानात् सा च समुत्था-
पिता सती समुत्थापकानां चमत्कारकारितानिबंधनमित्यस्त्यंगांगिभावः यथा वा त्रयी-
मयोऽपि प्रथितो जगत्सु यद्वारुणीं प्रत्यगमद्विवस्वान् मन्येऽस्तशैलात्पतितो न एव विवेश सु-
डौवडवाग्निमध्यम् अत्र प्रथमेऽर्थे विरोधप्रतिभोत्पत्तिहेतुः श्लेषः दर्शनानंतरं विरोधश्लेषोद्भा-
वलंकारो तदनुगृहीता द्वितीयेऽर्धे मन्येपदप्रकाशितोत्प्रेक्षा अतश्चांगांगिभावात्तयाहृ-
त्रयत्कावरामुत्प्रेक्ष्यते तत्र यतित्वांगिप्रवेशोऽवस्तुस्थित्यान्यथास्थितावप्यन्यथाभूताभ्यां ता।
भ्यामभेदेनाध्यवसितोऽत्रेयो नेनांगांगिसंकरः उत्प्रेक्षायां वा निमित्तगतातिशयोक्तेः सहा-
येसंकरः ताभ्यां विना तस्या अनुत्थानात् अतश्च निरवकाशत्वाद्बाधकत्वेन च मतं व्यविरोध-
मंतरेणापि श्लेषोऽदृश्यतेऽश्लिष्टश्लेषस्य सावकाशत्वमिति यत्नोनभ्रमः विरोधमंतरेण श्लेषान

अ॰लं॰
सू॰
६॰
67

भवतीति किं तर्ह्यलंकारान्तरविविक्तो नम्रेषस्य विषयोस्तीति निरवकाशत्वात्तेषां बाधः त
न्मध्ये च विरोधो न प्रविष्ट इति सोपि तेन बाध्यत इति न कश्चिद्दोषः एवमर्थालंकारसंकर
उदाहृतः शब्दालंकारसंकरस्तु केश्चिदुदाहृतो यथा रजति नटीयमभिहृतया नवरा-
सानि यातिसारावनदा गजता च यथमविरतिदानवरा यातिसारावनदा अत्र यमकानु
लोमप्रतिलोमयोः शब्दालंकारयोः परस्परापेक्षत्वेनांगांगिसंकर इति एतत्तु न सम्यगाव
र्जकम् शब्दालंकारयोः शब्दवदुपकार्योपकारकत्वाभावेनांगांगिभावात् शब्दालंका
रसंसृष्टिस्त्वत्र श्रेयसी यथोदाहृतं पूर्वं यद्यत्र शब्दालंकारद्वयमेकवाचकानुप्रविष्ट-
मिति तृतीयः संकरो ज्ञेयः एवमेकः प्रकारो दर्शितः द्वितीयप्रकारस्तु संदेहासंकरा-
ख्यो यत्रान्यतरपरिग्रहे साधकं प्रमाणं नास्ति बाधकं वा प्रमाणं न विद्यते तत्र न्यायप्रा
प्तः संशय इति संदेहसंकरस्तत्र विज्ञेयः यथा यः कौमारहरः स एव हि वरस्ता एव चै ६७
त्रक्षपास्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदंबानिलाः सा चैवास्मि तथापि चौर्य

सुरतव्यापारलीलाविधौरेवारोधसिवेतसीतरुतले चेतः समुत्कंठते अत्रविभावना।
विशेषोक्त्योः संदेहसंकरः तथाहि उत्कंठाकारणाभावेप्युत्कंठाया उत्पत्तेर्विभावना।
सच कारणाभावो यः कौमारहर इत्यादिना कारणविरुद्धमुखेन प्रतिपादितः तथा
यः कौमारहर इत्याद्युत्कंठाकारणसद्भावेप्यनुत्कंठाया अनुत्पत्तेर्विशेषो
क्तिः साच अनुत्पत्तिः समुत्कंठत इति विरोधोत्पत्तिमुखेनोक्ता अतएव द्वयोरप्युस्फुट
त्वमवगतम् नचानयोः प्रत्येकं साधकबाधकप्रमाणयोग इति संदेहसंकरोयम् यथावा
यद्वक्त्रचंद्रेन नवयौवनेन पश्मश्रुक्कलाद्युल्लिखितस्य कान्ति उद्दामरागाहृतमानमुद्रावि
द्रावणं मेत्र इव स्मरस्य अत्र वक्त्रं चंद्र इवेति किमुपमा उत वक्त्रमेव चंद्र इति किं रूपक
मिति संशयः उभयथापि समासस्य भावात् उपमितं व्याघ्रादिभिरिति उपमासमासो
व्याघ्रादीनामाकृतिगणत्वात् मयूरव्यंसकादित्वात् रूपकसमासः मयूरव्यंसकादी
नामाकृतिगणत्वात् नचात्र साधकबाधकप्रमाणसद्भाव इति संदेहसंकरः यत्रतुक

स्यचित्परिग्रहे साधकं बाधकं वा प्रमाणं विद्यते तत्र नियतपरिग्रहः तत्रानुकूल्यं साधक
त्वम् प्रातिकूल्यं बाधकत्वम् तत्र साधकत्वं यथा प्रसरद्बिंदुनादाय शुद्धामृतमयात्म
ने नमोनंतप्रकाशाय शंकरक्षीरसिंधवे अत्र शंकर एव क्षीरसिंधुरिति रूपकस्यामृत
अ॰ल॰ स॰ मयत्वं साधकं तस्य शंकरापेक्षया क्षीरसिंधावनुकूलत्वात् उपमायास्तु न बाधकं शं
६८ करेप्युपचरितस्य तस्य सद्भावात् यथा वा पतान्यवंतीन्दुवपारिजातजातानि तानि पति
68 पांडुरागिणि संप्रत्यहं पश्यत दिग्वधूनां यशःप्रसूनान्यवतंसयामि अत्रावतंसने प्रसू
नेष्वनुगुणमिति रूपकपरिग्रहे साधकं प्रमाणं बाधकत्वं यथा शरदीव प्रसर्पत्यात
स्यकोदंडटंकृतौ वितिद्रुद्धेभितहरिविंध्योदधिरजायत अत्र विंध्य उदधिरिवेत्यु
पमापरिग्रहे वितिद्रुद्धेभितहरिरिति साधारणविशेषणं बाधकं प्रमाणम् उपमि ६८
तंव्याघ्रादिभिः सामान्याप्रयोगे इति वचनादुपमासमासे प्रतिकूलत्वात्स्यनग्रयावि
शेष्याद्रूपकपरिग्रहः न तु शारदीत्युपमात्रोपमासाधकत्वेन विज्ञेया नहि चाशनयं

वाशसिद्धिः नह्येकेनालंकारेणाप्रक्रान्तेन निर्वाहः कर्तव्य इति राज्ञेयः नापि यर्मस्त

त्प्रकारवचनेनाप्येषन्यायः उत्तरोत्तरसाम्यप्रकर्षविवक्षणे प्रक्रान्तोपमापरित्यागेना-

रूपकनिर्वाहस्यौचितत्वात् विपर्ययस्त्विष्ट एव यथा येनेन्दुर्दहनो विषं मलयजो

हारः कुठारायते तस्मात्प्रकृते सामान्यप्रयोगउपमापरिग्रहे बाधक इति मयूर व्यंस

कादेराकृतिगणत्वाद्रूपकसमाश्रयेणात्र रूपकमेव बोद्धव्यम् एवं भाष्याब्धिः कान्ति

गंभीर इत्यादौ द्रष्टव्यम् साधकबाधकाभावेन संदेहसंकरः यथोदाहृतं तत्तीयस्त

प्रकार एकवाचकानुप्रवेशलक्षणः यत्रैकस्मिन्वाचके अनेकालंकारानुप्रवेशान

च संदेहः यथा स्मरागतिनिर्गतान्तने नरकप्रतिपंथिनी तवापि मूर्ध्नि गंगेव चक्रधारा

पतिष्यति अत्र मुरारिनिर्गतेति साधारणविशेषणोहि तत्का उपमा नरकप्रतिपंथि-

नीतिश्लिष्टविशेषणा समन्यस्योपमाप्रतिभोत्पत्तिहेतुः श्लेषस्यैकस्मिन्विशब्दे नप्रवि-

ष्टो तस्यामयोपकारित्वात् अत्र च यथार्थश्लेषणास्सहोपमायाः संकरस्तथा शब्दश्लेष

णासहृदयत्वेन यथा सद्यःकरस्पर्शोतितरं गणशोभिन्यमंदमारब्धमृदंगवाद्ये उद्यानवा
पीपयसेवयस्यामेरागीदृशेनानायमृहेरमंते अत्रपयसीवनाब्धिमृहेरमंतेइत्येनावेते
अ॰ल॰ वसमुच्चितोपमातिव्यन्नासद्यःकरस्पर्शोतितरंगेतिशब्दश्लेषेणासंदेहैकस्मिन्नेवशब्दे सं।
सा॰ कीर्णा शब्दालंकारयोः पुनरेकवाचकानुप्रवेशेनैवचात्रसंकीर्णत्वम् अतएवा।
६५ व्यवस्थितत्वमन्यानुभाषितमप्रयोजकम् तुल्यजातीययोरप्यलंकारयोरेकवाच
कानुप्रवेशसंभवात् शब्दार्थवर्त्यलंकारसंकरस्तुभट्टोद्भटप्रकाशितःसंसृष्टावंत
र्भावितइतित्रिप्रकारएवसंकरइहोक्तः इदानीमुपसंहारसूत्रम् एवमेतेशब्दार्था।
भयालंकाराःसंक्षेपतःसूचिताः एवमितिपूर्वोक्तप्रकारपरामर्शः एतेइतिप्रक्रान्ता।
स्वरूपनिर्देशाःसूचिताःअलंकारसूत्रैःसूचिताःसंक्षेपेणप्रतिपादिताः तत्रशब्दाल
कारायमकादयः अर्थालंकाराउपमादयः उभयालंकारालाटानुप्रासादयः संसृ। ६५
ष्टिसंकरप्रकारयोरपिकयोश्चिमद्रूपत्वात् लोकवदाश्रयाश्रयिभावस्तुतदलंकार